एवइ पढ़िअउ ए च्चउ वेउ इति। जातिभेदजानद्भिरेवम्पठितास्चतुर्व्वेदा:। ऋक्सामयज्वथर्व्वाश्च। एतच्चान्त्यजानां न विरुध्यते। पाठाधिकरणञ्चेति। द्वयोर्नावबोधात्। अथ शब्दमात्रे चावबोध। तदा सर्व्वेषामपि साधारणत्वमायाति। यथा व्याकरणमध्ये वेदान्तस्य शब्द: साध्यते। तदेव शब्दमात्रं लोकातिलक्षणं। न पुन: परमार्थ: कश्चित्। शब्दश्च नित्यरूपकं न नित्यं भवति स्वयम्भूश्चेति। कथमुच्यते नित्यम् इति। यथा लोकस्य [20a] सत्ता

2. A. न जानन्त ; A. भेड़ ; MS. restores as भेउ। 3.A. प्रभेदचेति। A, भेदस्य ; A. भेदमुते—HS. भेद उच्यते। 4. A. प्रथमतो जातिभेदं। A. वाक्यं. It is better to correct तन्निषिध्यते as तत् न सिध्यति। 5. A. प्रमाणागमाभ्यां युक्त्या। 6. A. ब्राह्मणोमुख आसीत्, HS. ब्राह्मणोमुखमासीत्। A. तस्मिन्नेव काले। A. °णोण्यस्मात्। B. ब्राह्मणोच्यत्यमेवस्यात्। HS. °नोऽन्यस्मात्। 7. A. °प्रमाणात् योनिसम्भव चेति; HS. प्रमाणात् योनिसम्भवाच्चेति। 8. A. अनेक पर्य्यालोचितं। 9. A. यत् मुख आसीदिति। A. धूर्त्तवचनादिति। 10. A. °स्तदेव न भवति। 10. A. कथ आह; HS. कथमाह। 11. A. तस्मान्निषिध्यते जाति:। 12. A. B. पटिअउ, MS. restores पढ़िअउ। A. ए चउवेअ MS. ए चउव्वेउ। 14. A. °अथर्व्वा:। A. एतए, B. एतञ्च (?). A. वान्त्यजाना ; HS. वान्त्यजानां। 15. A. चाववोध: 16. A. वेदात् तप। 17. A. पुन: HS. पुन। A. कश्चित् ; B. किञ्चित्। A. शब्दोवनित्यरूपकौ ; HS. शब्दोवानित्यरूपकौ। 18. A. नित्य।

नास्ति अनित्यत्वादिति। तथा तद्विलीनं वेदेषु प्रामाण्यं नास्ति। कारकाभावात् विरोधः। ग्रामो नास्ति कुतः सोमा। तत् कथं कारकं नास्ति आह स्वयमेव सिद्धत्वात् पुरुषकारकरूपं तच्च प्रत्यक्षेऽपि स्कन्धानां विनाशोऽस्तीति। प्रतीत्यसमुत्पादत्वात्। पूर्व्वाभावात् परस्य सत्ता नास्ति मायावद्रूपदर्शनात्। संयोगमात्रमेवेति। भ्रान्त्या सम्भवात्। एवं सर्व्वसंसारं भ्रान्तिमात्रतया अजानानाः षड्‌गतौ भ्रमन्ति। तन्निरोधात् सर्व्वं सुस्थं भवतीति। अनेनापि वेदः क्रियामा[20b]त्रं तन्न भवति। कारणाभावे कार्यस्योपचरणं। अलीकमेवेति विस्तरः। तस्मात् अविप्रमाणत्वे सर्व्वं क्रियते। स चाह—

**मट्टीत्यादिना अग्निहुणन्तमिति**। किन्तेन अग्निहोत्रेण च।

**कज्जे विरहिअ हुअवह होमेँ इति**। कार्यविरहितेनाग्निहोत्रेण। घृतादिहोमं नास्ति। कथं परमार्थमजानताञ्च फलन्न भवति। तदा अन्त्यजस्यापि तादृशं भवेत् निष्केवलं।

**अक्खि डहाविअ कड़ुएँ धूमेँ इति**। अत्यन्तकटुधूमेन चक्षुषि दाहं करोति। यया रोगपीड़ा भविष्यति। तर्हि [21a—21b] कथं। तेषां तत्त्वमाह। परब्रह्ममिति। तच्च नानाप्रकारं वदन्ति। ब्रह्मज्ञानमित्यादि। तत्र परब्रह्ममिति। याज्ञिकवचनहोमेन ब्रह्मत्वं यान्ति। तच्च स्वर्गकामोपभोगफलं तेषामभिलषितञ्च। तया स्वेतच्छागनिपातनया नरकादिदुःखमनुभवन्ति। सन्धाभाषमजानानत्वात् च। तस्मात् ब्रह्मब्रह्महत्या वेत्यापादि।

सर्व्वं ब्रह्ममिति वचनात्। एवं ब्रह्मज्ञानमिति। तदपि न सिध्यति। कुतो यच्चतुर्थवेदाथर्व्वणेन च तेषां योगाचारदर्शनं स न वेति। वेदत्रयेषु पाठमात्रमपि न सिद्धं। तदा सत्यविच्छिन्नं मृषैव वचनं। अथ तत्रोक्तं सर्व्वं नास्ति ब्रह्मज्ञानं। तदा वेदत्रयस्य प्रामाण्यं नास्ति तया निषेधात्। चतुर्थस्याथर्व्वणस्य स नास्ति, अन्योऽन्यविरोधात्। तस्मात् हि आगमेषु कथं ब्रह्मज्ञानं सिध्यति। असिद्धमेवेति। अथवा यद्यनुभवं भवति। तदात्यन्तमृषा वचनं। कुतः। यत् सर्व्वं शून्यमिति। वस्तुन उपलब्धिर्नास्ति। कुतस्तज्‌ज्ञानं भवति। अनुभवञ्च साकारत्वेनोपलब्धिस्तदाज्ञानमेवेष्यते। सर्व्ववस्तुनो अनुपल[22a]म्भादिति। वस्तु च लोककल्पितमज्ञानस्वभावं। न पुनः परमार्थः स्यादिति। परमार्थश्चास्मद्दर्शने सद्‌गुरोर्मुखात् लभ्यत इति।

एवं ब्राह्मणस्य पुनरपि चत्वारो भेदाः। ब्रह्मचारी वानस्पत्य गार्हपत्य यतिश्च। तदप्यसङ्गतं। कुतः यतः बालत्वे नास्ति निश्चयः। रक्षणभक्षणादिभावेषु। तथा ब्रह्मचारित्वं सर्व्वदर्शनानां दृढ़प्रतिज्ञायैव क्रियते। आजीवं यावत्। न तेषां निश्चयः। पुनरपि विवाहादिना गार्हपत्यमाश्रयन्ति। तत्रापि च न निश्चयः। वानस्पत्य [22b] त्वमाश्रयन्ति ध्यानमन्त्रजपादिकारणेन। तत्र

1. A. अनित्यत्वादिति; HS. अनित्यत्वादिति। A. प्रमाण्यं; HS. प्रामाण्यं। A. कारकभावान्; HS. कारकभावान्न; 2. A. सिमा, HS. सीमा। A. नास्तिः, HS. नास्ति। 3. A. सिद्धत्वात्। पुरुष—B. सिद्धत्वाद्दणहपुरुष—(?). A. कर्म्मना विनासी अस्तीति; HS. कर्म्मणा बिनाशोऽस्तीति। 4. A. पुर्व्वभावात्; HS. पूर्व्वाभावात्। A. सयोगं HS. संयोग-। 5. A. सम्भावात्; HS. सम्भवात्। A. अजानाना; 6. A. तं निरोधात् HS. तन्निरोधात्। A. भवति। 7. A. क्रियामावं न—A. कारणाभाव. HS. कारणाभावे; A. कार्य्यस्योपचारणमलीक—A. अविप्रमानत्वे 8. HS. अविप्रमाणत्वे, broken in B; 9. A. **अग्गिह्नणन्तेति**। MS. **अग्गि हुणन्त**। MS. reconstructs the stanza thus: **मट्टी [पाणी कुश लइ पढ़न्त। घरहिँ वइसी] अग्गि हुणन्त**। 10. A. **वभमवहइति**; MS. **वहन्ति होमे**। 11. A. फलं भवति। A. अन्तजस्य; HS. अन्त्यजस्य. 12. A. तादृशं तादृशं। A. निस्कैवलं, HS. निस्कैवल्यं। 13. A. **कड़ुए धूमेमिति**; MS. **कड़ुए धूमेँ**; B. कटुधुमेण, fol 21a-b missing in B. 14. A. तेषा, HS. तेषां; 16. A. ब्रह्मत्व HS. ब्रह्मत्वं; A. °भोगफल; HS. °भोगफलं।

2. A. सन्ध्याभाषजानानत्वा च; HS. °जानानत्वात् च। A. ब्रह्महात्या HS. ब्रह्महत्या। 3. A. सर्व्व व्रमिति: HS. सर्व्वं ब्रह्ममिति। 4. A. य चतुर्थं HS. यच्चतुर्थं। A. वेदार्थर्व्वणेन—printing mistake for वेदाथर्व्वणेन। A. योगाचारदर्शन HS. योगाचारदर्शनं। 5. A. मृषेवचनं HS. मृषैववचनं। 8. A. वचन HS. वचनं; 9. A. सुन्यमिति; HS. शून्यमिति। 11. A. परमार्थः स्यादिति occurs twice. A. परमार्थश्चास्माद्दर्शने HS. °श्चास्मद्दर्शने। 13. A. वेदाः; 14. A. यदिश्च: HS. यतिश्च। A. तदस्मसङ्गतं HS. तदप्यसङ्गतं A. यतो; 15. A. दृढ़-प्रतिव HS. दृढ़प्रतिवन्धः; A. आजीव; HS. आजीवं; 16. A. तेषा; H. तेषां। A. न पुनरपि, A. विवाहादिना; B. विहारादिना; A. गार्हपत्यत्वम-, 17. B. वाणस्पत्यत्व- A. ·जाप-

च न निश्चयः यदि यतित्वमभिलषति। सव्वयज्ञोपवीतादीनां धारणात् भक्षणात् नास्ति ब्राह्मणचण्डालयोर्भेदः। प्रस्तावतश्चण्डालत्वमेवेति। सत्यं कुतो यतः ब्राह्मणो चोरचण्डालादिना भ्रंशं करोति। तदा ब्राह्मणो वेद मालोचयति। तेन तस्या ब्राह्मण्याः घृतयोनिकरणात् शुद्धिः स्यादिति। तस्मात् सर्व्वं चण्डालकर्म्मैवेति। पुनरपि यतेरपि त्रयः प्रभेदाः—**दण्डि** इत्यादि।

**एकँ दण्डि त्रिदण्डी भअवँवेसेँ**
**विणुआ होइअइ हँस उएसेँ॥** इति॥

एकदण्डो त्रिदण्डोति भगववेशं भवति। एवं वेशेन विहरति। पुनरप्येतद्व्रतं त्यज्यं करोति। अन्यमाश्रयति। एतदेवाह—**विणु[आ होइ]अइ हँस उएसेँ** इति। यावन्न परमहंसवेशं भवति तावत् ज्ञानं न लभ्यते, सर्व्वसन्यासत्वात्। तदपि च न भवति। कुत[:] अविद्यावासनाग्रहग्रहोत्वात्। प्रत्यक्षं दृश्यते। गार्हपत्यत्यागकाले सर्व्वं यत्किञ्चित् द्रविणादि वस्तु साधितं तत्सर्व्वं पुत्र[23b]पौत्रादिभ्यो दत्तं न सर्व्वसत्त्वेषु साधारणं करोति। न केवलं जातिमवरोपणं करोति मदीयकुलाविनष्टत्वात्। तस्मात्—

नष्टास्ते मूर्खदेहिनोऽसत्कर्म्मवादिनः सदा।
न जानन्त्येव सत्तत्त्वं मोहिताः पूर्व्वकर्म्मतः॥

तया च स्वयं नष्टाः परानपि नाशयन्ति। एतदेवाह—**मिच्छेहि**त्यादि।

---

1. A. यदित्वम— ; HS. यतित्वम— : A. ०यज्ञोपवीता दिना— 2. A. प्रतावतो चाण्डालत्वमेवेति ; HS. एतावता० ; A चौरचण्डादिना ; HS. चौरचन्डालादिना। A. चौरचण्डादिना ; HS. चौरचण्डालादिना ; 4. A. आलुकुयति, HS. आलोचयति। B. तस्य, 5. A. यत्रेनापि B. यतेरपि। 6. A. **एव,** HS. **एक,** MS. **एक ;** A. **त्रिदण्डि,** A. **वेशेँ,** 7. B. **विणुपा ;** A. **होइअ ;** A. **हन्स,** A. **उवेसँ।** MS. restores **विणुआ होइअ हंसउ वेशेँ।** 8. A. एकदण्डि, A. त्रिदण्डी, HS. त्रिदण्डि ; A. वेसं ; HS. वेशं A. एव ; HS. एवं ; 9. A. त्याज्यं ; आश्रयन्ति। A. **विणुआ होइअ हन्स उवेसे** 11. A. तावज्ज्ञानं 13. A. पुत्र पुत्रादि° ; A. साधारण, HS. साधारणं, A. केवल, Hs. केवलं, 14. A. जातिमवरोपन, HS. °रोपनं। A. °कुलाकुलानष्टत्वात्, 16. A. जानंतेव HS. जानन्त्येव A. सत्तसत्त्वं 17. A. has ते before तया and has no च after it. A. **मिच्छे**इत्यादि।



**मिच्छेहिँ जग वाहिअ भूल्लेँ** इति। मृषावाक्येन समस्तजगत् मूर्खलोकः कुमार्गेषु बाहितः। इदं च—

**धम्माधम्म ण जाणिअ तुल्लेँ** इति। इह धर्म्माः सर्व्वपदार्थाः सत्त्वनि[24a] कायादिरूपाः करुणाविषयाश्च तद्रहिता अन्येऽधर्म्माः कायादिलक्षणाः ताभ्यां तुल्यमद्वयं न जानन्ति विशिष्टमार्गमिति सिद्धान्तः। संक्षेपतो विस्तरोऽन्यत्रावसेयः। न पुनः पुण्यपापादितुल्यमिति।

इदानोमोश्वराश्रितानामुच्यते। **अइरि** इत्यादि **दक्खिणँ उद्देसेँ** इति।

अत्र—

**अइरिएहिँ उद्दूलिअ च्छारेँ** इति। अयिरोति उद्दूलितं क्षारेण। एवं बाह्यभस्मना स्वचितमङ्गानि भगवेषु निश्चयमतत्वात्। पुनरपि—

**सीससु वाहिअ ए जड़भारेँ** इति। शिरसि[24b] नानाकेशकृतं जटाभारं वहन्ति। अन्यच्च—

**घरही वइसी दीवा जाली** इति। लोकस्य कुहनया स्वस्थानेषु प्रदीपं प्रज्वाल्य स्थितत्वात् च।

**कोणहिँ वइसी घण्डा चाली** इति। ईशानकोणमाश्रित्य घण्ढां चालयति। पुनरत्रैव—

**अक्खि णिवेसी आसन वन्धी** इति। एतच्च कुहनाया मूललक्षणं। चक्षुर्निमेषोन्मेषाभ्यां कृतं। आसनं पर्य्यङ्कं वा निवन्धनं कृत्वा तदनु—

---

1. A. **भूल्येँ** 2. A. समस्तं जगत् A. कुमार्गे। HS. takes इद['] च as a part of the *dohā* by mistake ; 3. A. **धर्म्माधर्म्म** A. **तुल्येँ** 4. A. तत्रहिता A. °धर्म्मकायादि° 5. B. विस्तरान्यत्रावसेयं 7. A. **दच्चिण,** B. **दच्चिणँ ;** MS. restores **दक्खिण** A. **उवेसे** 9. A. **अइरिएहिँ,** B. **उद्दूलिङ(?) ;** A. अइरोणि 10. A. स्वचितांगानि A. भगवेशेषु A. निश्चयमज्ञानात्, 11. A. **वाहिय।** 12. A. जटाभार, HS. जटाभारं। 13. B. **घरही ;** B. **वअसी,** 14. A has no च after स्थितत्वात्। 15. A. **कोनेहिँ** B. **घण्टा,** A. घण्डा HS. घण्डां ; 17. A. **अखि ;** A. कुहणया— 18. B. चक्षुषिमेषोन्मेषाभ्यां कृतं। A. पद्मासनं पर्य्यङ्कनिवन्धनं।

**कस्रोहिँ खुसुखुसाइ जन धन्धौ।** एवं पूर्व्वोक्तं अयिरिकस्य लक्षणं दृष्ट्वा धन्धजनानां[25ᵃ] हेयोपादेयमजानताश्च कर्णाभ्यां खुसुखुसायति। अन्योऽन्यमालोचयन्ति—इदं विशिष्टमार्गं तत्राहं लग्नोऽस्मि शृणुत जनाः।

**रण्डि मुण्डी अस्स वि वेसेँ** इति। रण्डीति स्वामिरहिता। मुण्डीति मासिकोपवासीकी या। अन्याः पुनर्नानावेशधारिण्यो व्रतिन्यः। ताभिस्तस्य मार्गमग्नाभिः इति। एवं किम् विशिष्टोऽस्य गुरुरित्यत आह। [निष्केवलं तर्हि।

**दिक्खिज्जइ** इति। विम्बकं दृश्यते। किन्तत् गुरु—

**दक्खिण उद्देसेँ** इति। दक्षिणोद्देशमात्रेण स्वार्थहेतुना सत्वान् [25ᵇ] क्लेशेषु निपातयन्ति। स्वयमजानताश्च। किञ्चि(त्) चेतदेवाह।] सर्व्वमीश्वरमिति चेत् न भवति। कथं न भवतीत्याह प्रमाणागमयुक्त्या च। तर्हि इह संक्षेपत उच्यते इह हि सर्व्वं नाम न किञ्चिद्वस्तु अस्ति। कथं तत् यस्मात् पृथिव्यादिधातवः सर्व्वं पिण्डपरमाणवो रूपकायाश्च परमाणवश्च षड्भागभेदेन नोपलभ्यन्ते। तदा वस्तु न वस्तु। कथमीश्वर इष्यते असिद्धत्वाच्च। व्यापकाभावे व्याप्यस्योपलब्धिर्नास्ति। अथवा कर्त्तृत्वं वदन्ति इति चेत्। तदा उच्यते [26ᵃ] तत्र कथं क्रमेण च युगपद्वा न नित्येनार्थः क्रियते।

---

1. A. **कस्सेहि** A. **जनवन्धौ;** A. **खुसखुसाइ** A. अइरिकस्य; 2. A. खुसखुसायति। 3. A. तत्राह, HS. तत्राहं; शृणु च 4. A. **अण्ण** A. रण्डी, 5. A. मासिकोपवासीकी; B. अन्या; A. व्रतिन्यस्तास्तस्य मार्गं सम्मग्ना। 6. A. एवं विशिष्टस्य गुरोरित्यत। [ ] The portion within brackets (lines 6-10) is omitted in A. 8. A. MS. restores this *pāda* as **[दिक्खा देइ] दक्खिण उवेसे।** 11. A. सर्व्वमीश्वरमय[मि]ति चेत् तन्न भवति। A. प्रमाणागमाभ्यां युक्त्या; 12. A. स्फुरति instead of अस्ति। 13. A. रूपकाश्च; A. षड्भाग भेदेनोपलभ्यन्ते; 14. A. has च after तदा; A. तेष्य सिद्धत्वाच्च; B. इष्यतेऽसिद्धत्वाच्च। 15. B. व्यापस्यो°। 16. A. has no च after कथं, B. क्रमेन ;A. युगपद्वाननित्योऽर्थः क्रियते।



तस्मात् नास्त्येव तस्य बहिर्वस्तु अध्यात्मकल्पितं वा। एतदेवाह। शक्तश्चेत् किन्देशकालादिरपेक्ष्येत। तस्मात् युगपत् न स्यात्। किं तत् सृजेत्। असौ अपेक्षतश्चान्यां। वस्तु न नित्यो नापि शक्तिर्भवति। भावस्तु नित्यो नास्ति। कुतः। भावश्च क्षणिक सर्व्वकालतः अन्यच्च विषयविषयिभ्यां नेष्यते। कुतः। यतश्चक्षुभ्यां रूपादीन् दृश्यते। भ्रान्तिमात्रतः। विचारेणापि यत् घटपटादि न दृ[26ᵇ]श्यते तत् पूर्व्वाभावात् कथं परमाण्वादि उक्तलक्षणतया विषयीभवति। यथा स्कन्धादीनां लक्षणं न पिण्डपरमाणवो बाह्यकं इति। अथ यदि नील-पीत्याद्याभासस्य ख्यातिस्तदपि न भवति। प्रत्यक्षविरोधेन नात्मनस्तस्य सत्ता नास्ति। तत् कथं चक्षुर्विज्ञानादिषु ग्राह्यग्राहकभावेन प्रवृत्तिः। सति भ्रान्तिमेवेति बालजनैः कल्पितमिदं श्वेतमिदं पीतमित्यादि।

पुनरेवाह—अपीतमपि नाभ्यस्तं गच्छत्यप्ययनं पुनः। तस्य किन्नाम यवधाराबा[27ᵃ]हिनो विघ्नमिर्न भवति। तदा कथं न विस्मर्य्यते। अन्यच्च वैषम्यशैलजातानामपि महोदधेर्मानात्यन्तं तथा सूक्ष्माणुपरिमाणानां को वा कुर्य्यात् तदकर्म्मकः। करोति वा बलशालित्वादिति चेत्। स एवोन्मत्तवत् भवति। नाशकाले श्रममात्मनः कथं नाशयेदिति। अथवाशक्तमेव क्रियते। अयस्कान्तोपलादीनाञ्च शस्त्राद्याकर्षणं प्रतिनिषिध्यते। तत् पुनर्विज्ञानागमे निषिद्धः। कायानुस्मृत्युपस्था[नाद्यस्था]नत्वात् कायं पुनः [27ᵇ] कुत्सितपञ्जरं विचारादवस्तु। एतदाह—

---

1. A. तर्हि instead of बहि; A. अध्यात्मकल्पित HS -कल्पितं। 2. A. किदेशकालाद्यपेक्ष्येत HS किन्देशकाला°; 3. A. अपेक्षतश्चान्यवस्तून्। A. शक्तिभवति; HS. शक्तिर्भवति। A. भाववस्तु instead of भावस्तु; 4. A. भावः; A. क्षणिकः 5. A. रूपादि दृश्यते। 6. A. पूर्व्वाभात् HS. पूर्व्वाभावात्। 7. A. स्कन्धादीना; HS. °दीनां। A. पिण्डपरमाणुवाह्यकं। A. नीलपीताभ्यां भासस्य ख्याति[:] तदपि—A. भ्रान्तिमात्रमेवेति। 10. A. पीतमिति। 11. A. अधीतमपि; B. न भ्यस्तं; A. गच्छत्यध्ययनं; 13. A. दैषम्य; HS. वैषम्म; A. महोदधेर्नामा°; A. सूक्ष्मानापरिमाणानां; HS. सूक्ष्मानां-; 14. A. वलसाहित्वादिति; A. एवोन्मत्तो भवति; 16. A. वस्त्राद्याकर्म्मेण HS. वस्त्राद्याकर्षणं; A. न सिध्यति। 17. The portion within the brackets added in the margin of B.

अस्थिपञ्जरतो मांसं प्रज्ञाशस्त्रेण मोचयेत् ।
अस्थीन्यपि पृथक्कृत्वा पश्य मज्जानमन्ततः ॥
किमत्र सारमस्तीति स्वयमेव विचारितं ।
लालामूत्रपूरीषवाष्परुधिरस्वेदान्त्रमेदोवसा—
पूर्णः कायकलिः सदा व्रणमुखैः प्रस्यन्दते चाशुचि इति ।

तस्मात् न विज्ञानस्य स्थानमस्ति वासनामात्रमेवेति। तच्चाविद्यावशाज्जायते। तः सर्व्वे दोषाः सम्भवन्ति। तथाचोक्तं—सत्यात्मनि परसंज्ञा स्वपर[28a]विभागात् परिग्रहद्वेषौ—

अनयोः संप्रतिवद्धाः सर्व्वे दोषाः प्रजायन्ते इति ।

तस्मात् प्रसिद्धं प्रतीत्यसमुत्पादलक्षणमिति। यदि वा अवलम्बते किञ्चित् देवतात्मशरीरं तत्र भवति। कुतः यदीश्वरं नास्ति तया रहितं किमन्यं देवतां साधयति। तन्मयमिति वचनात्। तस्मात् न भवति। अथ युगपदनुभवं साध्यते। तदपि न भवति। पूर्व्वेऽनुमानस्य सत्ताऽसिद्धाः। यदि वा धुनन-कम्पनद्यावेशं कुरुते। तदा कुहिकार सत्यसाक्षात् अनुभवेयुः। निरुपलम्भत्वात्। त[28b]दपि प्रत्यात्मवेदके न भवति। एतदेवाह—

प्रत्यात्मवेदता तस्य कीदृशी नाम कथ्यतां ।
प्रत्यात्मवेद्यं वदतां वस्तुत्वं तस्य चेष्टितं ॥
इदं तदिति तद्वक्तुं तदशक्यमिति चोद्यते ।
स्वनिश्चयं तदन्येषां निश्चयोत्पादनाय तु ॥

1. A. पञ्चरतो ; A. मोचय(येत्) ; B- मोचययै। 2. A. मज्जानमतत: ; HS. °न्ततः। 3. A. विचारय। 4. A. °वसाः HS. वसा। A. कायकलि A. व्रणमुखे ; 5. A. has no इति after चाशुचि। 6. B. original विज्ञानमस्ति corrected in the margin as विज्ञास्य स्थानमस्ति which is to be restored as विज्ञानस्य—, 7. A. ते। 9. A. प्रजायन्त 10. A. अवलम्बयते। 11. A. दैवता°। A. तया रहितं किमख्यतैव तां साधयति। B. तया रहित किमन्यं देवता साधयति। 12. A. तन्न यतिवचनात्। 13. A. सत्ता निषिद्धा। 17. B. प्रत्यात्मवेद्य। A. चेष्पितं, 18. A. has वस्तुत्व['] instead of तद्वक्तुं A. चोच्यते। 19. A. सनिश्चयवदन्येषां।



साधवस्तु प्रवर्त्तन्ते नित्यमव्यभिचारिणः ॥
वेदकस्य यद्वेद्यं वेद्याभावे न वेदकः ।
वेद्यवेदकयोरेवं अभावतः किन्तु नेष्यते ॥ इति ।

तस्मात् प्रतीत्यसमुत्पादमेवेति ईश्वराश्रितं निरस्तः। इदानीं क्षपणकानामुच्यते। तत्र **दोहणक्ख जइ** इत्यादि **ता[वपर] केवल**[29a] **साहइ** इति पर्य्यन्तेन। एवं—

**दोहणक्ख जइ मलिणेँ वेसेँ** इति। अर्हन्ताश्रित एव देहिनः सर्व्वलोकाः कपटकुहनत्वेन भक्षिताः। मलिनवेशधारिणः स्वयं तत्त्वमजाननाश्च पुनरपि स्वशरीरेषु दुःखदायकाः। तमाह—

**णग्गल होइ उपाडिअ केसेँ** इति। नग्नेन प्राप्तं केशानामुत्पाटनेन कर्म्मणा न परमार्थः कश्चित्। एवमुक्तेन किं स्यात्।

**खवणेहि जाण विड[वि]अ वेसेँ** इति। क्षपणकेन मार्गविडम्बितं यादृशं तादृशं न भवति। कुतः। नित्यानित्यव्यवहार[29b]त्वात् तन्मार्गमजाननाश्च तेषां यमाश्रयं कुर्व्वन्ति तैः।

**अप्पण वाहिअ मोक्ख उवेसेँ** इति। आत्मनो कुकर्म्मकुमार्गेषु वाहितं मोक्षोद्देशेन तच्च मोक्षं न सिध्यते। वक्ष्यमाणत्वात्—

**जइ णग्गा विअ होइ मुत्ति ता** इति। यदि नग्नानां भवति मुक्तिस्तदा—**सुनह सिआलह** इति। श्वानशृगालादीनां किं न भवति मुक्तिः। अथ—

2. A. वेदकाश्च यद्वेद्यं HS. वेदकस्य च यद्वेद्यं ; B. वेदकाख्ठदयेद्वेद्यं 3. A. वेद, HS वेद्य। A. अभावः A. किमु 4. A. ईश्वराश्रित[:] 5. A. **दोहणक्ख** ; A. **साह** इति, 7. A. **दोच्चणाखज्जे**, MS. **दोहणक्ख जे** ; B. **दोहणक्खज्जइ** 10. A. **होइअ**। A. **उपाट्टिअ**। 11. B. परमार्थं किञ्चित्। 12. A. **खवन' हि जान**, 13. A. यादृश, HS. यादृशं। A. तन्मार्गमजानतानश्च ते पापमाश्रयं कूर्व्वन्ती ते ; HS. तन्मार्गमजानताश्च— 15. A. **अप्पणु**, A. **उएसेँ**, HS. आत्मम:, A. वाहितं, 16. A. has दृश्यते instead of सिध्यते। 17. A. **णग्गा** A. नग्नाना, HS नग्नानां, 18. A. **शुनह**, A. **शिआलह**, A. श्वशृगाला° 19. A. मुक्ति, HS. मुक्तिः।

**लोमुपाड़णेँ अत्थि सिद्धि ता** इति। लोमोत्पाटितेन सिद्धिरस्ति यदि तदा—**जुवइ णिअम्वह** इति। [30a-b] युवतिस्त्रीणां नित्यरोमोत्पाटनकर्म्म। तासां नितम्वस्य किन्न मुक्तिः स्यात्। अथवा—

**पिच्छीगहणे दिट्ठ मोक्ख** इति। क्षपणकेन मयुरपिच्छिकाग्रहणेन यदि मोक्षो दृष्टः—**ता करिह तुरङ्गह** इति। तदा हस्त्यश्वानां गूढ़पक्षरेषु मयूरपिच्छिकाभरणमालया मोक्षः भवति। न भवतीति यावत्। अन्यच्च—

**उच्छेँ भोअणेँ होइ जाण** इति। उञ्छितभोजनेन यदि भवति ज्ञानं **ता करिह** इत्यादि पूर्व्ववत् एव—

**सरह भणइ खवणाण मोक्ख मह्हु किम्पि ण भावइ** इति। सरोरुहवज्रपादेनोक्तं क्षपणकानां यन्मोक्षं तन्मम किञ्चिन्मात्रं न प्रतिभासते। कुत इति चेत् आह—

**तत्तरहिअ काआ ण ताव पर केवल साह[इ]** इति। तत्त्वरहितं किमन्यत् तावत् आत्मनाऽज्ञानता परेऽपि लोकाः केवलमनर्थैकपाते। यदा तेषां सिद्धान्तः यज्जीजनिकायादिलक्षणमनित्यं पुनरपि यत्तेषां वचनमस्ति तत् वनस्पतीनां जीवमिति। तन्न भवति कस्मान्न भवति इत्याह। स्कन्धादीनां विनाशो भवति यदा तदाऽनित्य एवमेको जीवनिकायः द्वितीय वनस्पतयः तृणवनकानना[31a]दि।

1. A. **त,** HS. **ता।** A. लोमोत्पाटनेन। 2. A. यदा। A. **णित्यम्वह।** Folio 30a-b is missing in B.

4. A. **दिट्ठि** MS. corrects as **दिठ्ठ।** 5. **करिह तुरङ्गह** can not be taken as the last part of the *pāda*. MS. reconstructs from Tib. **मोरह चमरह।** 7. A. **उवेभँ** MS. corrects as **उञ्छ।** 8. **करिअ** should **करिह।** HS. takes एव as a part of the dohā through mistake. 9. A. **खवनान** should be **खवणाण।** A. **मोक्ष** MS corrects as **मोक्ख,** 12. **साह** should be restored as **साहइ।**



तृतीयं पृथिव्यादि चतुर्धातवश्च। एवं षड्जीवनिकायाः। एतत् सर्व्वं न भवति। कुतः। यतः सर्व्वं जड़धातवः। तेषां कुत्र जीवमुपलभ्यते। न लभ्यते इति यावत्। अथ पुरुषायत्तं जीवं। तत् पूर्व्वं ईश्वरनिराकरणे निरस्तं। एतदुक्तेन किं स्यात्। सर्व्वमेवानित्यरूपं स्यात्। कथं तर्हि प्रतीत्यसमुत्पन्नत्वं। प्रतीत्यसमुत्पादश्च भ्रान्तिरूपं। लोकस्य स्थिरत्वाभावात्।

इहलोकं विहाय स्वर्गादिगमनं करोति। बोधानामपि तादृशमिह जन्मना सत्त्वार्थं कृत्वा [31b] तदा स्कन्धपरिणामेन अन्यलोकं गत्वा सत्त्वार्थं निष्पाद्य पुनरपि तत्परित्यागात् स्कन्धादिग्रहणं कुर्व्वन्ति इति। सर्व्वकालतः अलातचक्रवत्। [पूर्व्वकरुणा प्रणिधानाच्च। किन्तु विशेष … … मायावत् न सत्यं न मृषा च लोकरूप्या पुन नित्यरूपमिति सिद्धं। नार्हन्तवत्।] किन्तु तेषां नित्यरूपमोक्षं तन्न भवति। कुतः यतस्तेषां वचनं त्रैधातुधातुकस्योपरि छत्राकारं मोक्षं। तच्च षड़शीतिसहस्रयोजनानां प्रमाणं। एतदेव न सिध्यति। यतः त्रैधातुकस्य विना[32a]शोऽस्ति छत्रं कुत्र स्थाने तिष्ठति। तस्मात् मोक्षनित्यरूपं न भवति। अनित्यमेवेति स्यात्। इति संक्षेपतः विस्तरेणान्यत्रावसेयं।

इदानीं श्रमणानामुच्यते। तत्र **चेल्लू** इत्यादि **नउ परमत्थ एक्क तेँ साहिउ** पर्य्यन्तं।

**चेल्लू भिक्खु जे त्थविर उद्देसेँ।**
**वन्देहिँ अ [पव्वज्जिउ] वेसेँ॥** इति।

1. A. °निकायास्तु। 2. A. कुतो instead of कुत्र। 4. A. कि ; HS. किं। A. कथ, HS. कथं। A. तर्हि समुत्पन्नत्वं। 5. A. प्रतीत्यसमुत्पादश्च। A. B. भ्रान्तिरूपं। B. लोकस्य। A. स्वर्गादिगमन- HS. °गमनं। A. बोधानामिति। 6. A. जन्मनि 8. B. कुर्व्वन्ति इति broken in B. B. अलात्चक्रवत्. 9-10. The portion within brackets is omitted in A. 11. A. नित्यरूपं मोक्षं। A. यतस्तेषा, HS. °स्तेषां। 13. A. मोक्षनित्यभूयं। 14. B. विस्तरेणान्यथावशेषं।

15. B. इदानी श्रवणा°। A. **वेलु।** A. **परमच्छ एक ते षाहिउ।** 16. A. पर्यन्ते। A. **वेल्लू।** 17. A. **भिक्ख।** A. **थविर, उएसे** MS. restores: **थविरउ वेसेँ।** 18. A. **वन्देहि अ यज्जइ उएसेँ।** In B the portion **—अ यज्जइ** is broken ; MS. corrects A: **वन्देहि अ पव्वज्जिउ एसेँ।** A has no इति।

चेल्ल: दशशिच्चापदी। भिच्चु कोटिशिच्चापदी। स्थविरो यो दशवर्षोपपन्न:। ते सर्व्वे काषायधरवस्त्ररूपमात्रं प्रव्रज्यां गृह्णन्ति। तेन देशनभिच्चणशीलत्व-च्चमान्नाचरन्ति। [32ᵇ] न तत्त्वत: तत्त्वम् जानन्ति। शठकपटरूपेन सत्त्वान् विहेठयन्ति। यदुक्तं भगवता पश्चिमे काले पश्चिमे समये मयि परिनिर्वृते पञ्चकषायकाले च ये भिच्चव: मम शासने भविष्यन्ति। ते सर्व्वे शठकपटरता भविष्यन्ति। तथा गृहारम्भे सति कृषिवाणिज्यादिरता: सर्व्वपापकर्म्माणि करिष्यन्ति। शासने विडम्बका: यत् पूर्व्वं मारकायिका: तत् सर्व्वं ते श्रमणरूपेणावतरिष्यन्ति। तत्र मध्ये संघस्थविरास्ते सांघिकोपभोगं हरिष्यन्ति इत्यादि विस्तर:। न तेषां [33ᵃ] बोधिस्तत् कथं। ये श्रावकयानमाश्रितास्तेषां उक्तलच्चणेन भङ्ग:। भङ्गात् पुनर्नरकं यान्ति। अथ शिच्चारच्चणमात्रेण विनयोक्तलच्चणाया: स्वर्गोपभोगमात्रं भवति। न पुनर्बोधिरुत्तमा कुत: यदा स्थविरार्थ्यानन्द: परिनिर्वृतस्तदा तेन न कस्यचित् समर्पितं। श्रावकबोधिरुपदेशं स स्यात्।

अथ महायानमाश्रयन्ति। तत्रापि निश्चयं न भवति। कुत: यत: पूर्व्वमार-कायिकत्वात्। यदि वा सुस्थितं तदपि अनिश्चितं एतदेवाह—

कोइ सुतण्त वक्खाण वइट्ठो- इ [33ᵇ] ति। क्वचित् भिच्चु: तत्त्वव्याख्यानं करोति। पूर्व्वेणाश्रुततया स पुनर्नरकादिगमनं करोति—द्रव्यादि-लोभेन च।

---

1. A, वेल्ल [:] दशशिष [:] यदा। A. कोटिशिष्या यदा। A. यो दशवर्षोपसयन:। 2. B. कार्षायधरवस्त्र्य (?)। B. रूपमात्रां (?)। A. तेनोदेशनभिच्चणशील च्चमा [:] चरन्ति। B. तेन देशनभिच्चण शीलत्वच······न्ति। 3. A. तथ। B. तत्त्वत:। 5. A. भिच्चवो। 6. A. कृषिवाणिज्यरता। 7. A. शासनविड़म्वका:। A. ये B. यत्। A. सर्व्वं। B. तत् सर्व्वं ते। 8. A. °भोग HS. भोगं 11. A. यत: for यदा। 12. A. समर्पित:। A. श्रावके वोधिरुपदेश स्यात्। 16. A. स्वतन्त्त, MS. सुतन्त। A. वोइट्ठो। B. वइ[ट्ठं], the last letter is broken.



कोवि चिण्ते कर सोसइ दिट्ठो इति क्वचित् वै चित्ता सर्व्वधर्म्मा क्रियते वदन्ति पुन: आगमपुस्तकाच्चरविचिन्तमान तत्साधनं करोति द्रव्यन् तत्। पाठानवबोधात् अपायगतिं यास्यति। एवं चिन्तयापि चित्तशोषं च करोति। ते रोगा बभूवु:।

असु तहि महजाणहिँ धा[इ]—[34ᵃ⁻ᵇ] * * *

[35ᵃ]-णंगमिष्यन्ति। भ्रान्त्या च तेन भ्रान्त्या अपायगमनं करोति। तस्मात् भ्रान्ति·र्नाम विकल्प:। [भ्रान्ति]वर्जनात् मुक्ति:। एवं—

णउ परमत्थ एक्क तेँ साहिउ इति। तेन श्रमणादिना युक्त्या विचार्य्यमानेन श्रावकादि परमार्थमेकं साधितं। निष्केवलं व्रतचर्य्यादिना जीविकाहेतुना प्रवृत्तिरिति। तत्र समुदायार्थमाह—

जो जसु जेण होइ संत्तुट्ठो।

मोक्ख कि लव्भइ ज्भाण[प]विट्ठो इति—यो येन दृष्टेन भवति सन्तुष्टं तस्य मार्गमात्रं श्रावकयानादि भगवता सन्दर्शितं [35ᵇ] तत्र यानेषु प्रविष्टा मोच्चं लभन्ति। वाच्यवाचकलच्चणो न भवतीति यावत्। स ······ क्रियते। तावत् दुष्प्राप्यमिति। एवं तत्त्वरहितया तीर्थिकादिना च समुदायेनाह—

किन्तह दीवेँ किन्तह णिवेज्जँ इत्यादि। किन्दर्शनेन किन्तत् नमस्कारेण।

किन्तह किज्जइ मन्तह सेव्वँ। किन्तेन कर्त्तव्यं मन्त्रसेवनया। अथवा किं प्रदीपेन किं नैवेद्येन [ज्ञा]न-रहिततया न किञ्चित् कार्य्यमस्ति। तथा—

---

1. A. को विचित्तेँ A.B. कर सोसइ MS. करइ सोस। A. क्वचित् चित्र['] सर्व्वधर्म्माणा['] करोति। 2. A. °पुस्तकाच्चरा विचित्तेन। A. तत् शोधनं A. रुच्य' for द्रव्यन् 3. A. चित्त सोषं। HS. चित्त शोषं। 4. B. ते रोगा। 5. A. असोंत *** 34ᵃ⁻ᵇ of B. is missing. The portion (p. 65, l. 5—p. 66, l. 15) from असु to सहजमेवेति is missing in A. 8. B. लउ (?) for णउ B. एकन्तँ for एक्क तेँ MS. restores the preceding line as: सहज छड्डि जेँ निव्वाण भाविउ।

किन्तह तित्थ तपोवण जाइ इति। किं तत्र तीर्थं ... [36a] स्यादि। किन्तेन तपोवने गमनया।

मोक्ख कि लब्भइ पाणी ह्लाइ इति। अनेनोक्तेन तीर्थाश्रये[न] पानीयस्नानपवित्रेण किं मोक्खो लभ्यते। न लभ्यते इति यावत्।

च्छडुहु रे आलीकावन्धा इति। हेयपुरुषा मिथ्याबन्धनं कल्याणमित्रोक्तं तीर्थादिकं त्यजेथ। येन नरकादिं यास्यथ। लोकायमतादिनाच। नास्ति दत्तं नास्ति हुतं न सन्ति श्रमणाः नास्ति ब्राह्मणाः। नास्ति [प]रलोकः। यावत् जीवेत् सुखं जीवेत् तावत् मृत्योरगोचरः। भस्मीभूतस्य देहस्य पुनरा[ग]मनं [36b] [कुतः] इति। उच्छेददृष्टित्वाच। अथवा सांख्या[:] वदन्ति। सांख्या प्रधानमिच्छन्ति नित्यं लोकस्य कारणेत्यादिना शाश्वतः। तेन किं क्रियते न कल्याणमिति चेत्।

सो मुच्चहु जो अच्छहु धन्धा इत्यादि। समुदायार्थेन विशिष्टचर्य्या सूचयन्नाह। सन्मार्गेषु अधिमोक्षं कुरु। येन कृते सति स्वार्थं करिष्यसि। अयुक्तमार्गं मुञ्चसि त्यज—येन धन्धतायां स्थितिर्न करिष्यसि। सन्मार्गेण निर्द्वन्द्वं यास्यसि। सहजमेवेति नान्यः। एवं—

तसु परिआणेँ अस ण कोइ इति। तस्य स[37a]हजस्य परिज्ञाने अन्यं मोक्षं न किञ्चिदस्ति।

अवरेँ गणेँ सव्व वि सोइ॥ अन्यैः सर्व्वैर्मोक्षसमूहं यत् परिकल्पितं पृथक् पृथक् तत् सर्व्वं सहजमेवेति नान्यत्। किन्तत् सहजमजानानाश्च भ्रमन्ति संसारे घटीयन्त्रवत्। स च सद्गुरु पर्य्युपासितेनोपलभ्यते। तत्र सहजे वाच्यवाचकौ न लभ्यते।

15. A. नान्य। 16. A. has no इति after the *pāda*. 18. A. अवरे अणि सज्जइ सोइ, MS. अवचेअणि सव्वोइ सोइ—19. A. सर्व्वं सहजे— A. सहजमजानन्तो। 20. A. संशरे, HS. संसारे। 21. A. लभ्येते।



वाच्यवाचकसम्बन्धात् न विद्येत् सहजं त्रिषु।
देशनापदयोगेन ख्यापितं भगवता क्वचित्॥
पुस्तके दृश्यमाने च सत्वार्थाय न संविदात्।
यत् यत् दृश्यति वस्तुस्य भ्रान्तिरूपादिकल्पना।
तत्तद्वस्तु न दृश्येत अभ्या[37b]न्तं गुरुपर्व्वया॥ इति तस्मात्—

सोवि पढ़िज्जइ इत्यादि। पाठस्वाध्यायादि यत्किञ्चित् क्रियते लोकोत्तरं सहजमयं यान्ति। न केवलं लोकोत्तरं लौकिकमप्याह—

सत्थ पुराणेँ [वक्खाणिज्जइ] इति। यत्किञ्चित् शास्त्रपुराणादि-व्याख्यानं क्रियते तत् सर्व्वं सहजस्यैव नान्यस्य। तदाह—

णाहि सो दिट्ठि जो ताउ ण लक्खइ इति। एवं सहजोक्तक्रमात् यावत् पुरुषेन लक्षितं तावत्तेन मोक्षं न दृष्टं। येन क्लेशक्षयं तत्क्षणात् करोति। कथं दृश्यतेत्याह—

एक्केँ वर इत्यादि। एते[38a]न निस्केवलेन वरप्रवरगुरुपादापेक्षितेन लक्ष्यते। एवं स्पष्टार्थमाह—

जइ गुरु वुत्तउ हिअइ पइसइ इति। यत् गुरूक्तमार्गं हृदयगतं भवति। तदा—

1. A. °सम्बन्धा न सन्ति सहजे त्रयः। 2. A. भगवान्। 3. B. दृष्टमाने; 4. A. संविधात्। 4. A. यद्दृचति for यत् यत्°। A. वस्तुसंज्ञा for वस्तुस्य। 6. A. पठिज सोवि— MS. supplies the second part of the pāda: सोवि गुणिज्जइ। 8. A. गच्छ for सत्थ। B. वक्खाणिज्जइ indistinct. 10. A. दिठ्ठि MS. दिट्ठि। A. लक्खाइ। 11. A. पुरुषे न- HS. पुरुषेण न। 14. MS. restores the whole *pāda* as एक्कु पर गुरुपाआ पेक्खइ। 14. A. एव HS. एवं B. प्रष्टार्थम्— 15. A. गुरुवुत्तवो। हिअहि पइस्सइ A. गुरूक्त-मार्गं— B. गुरोक्तमार्गं। A. ह्रदयगतं HS. ह्रदयगत।

**णिच्चिअ हत्थेठ विअ ण्दीसइ ।** यथा क्वचित् पुरुषेण चिन्तामणिं प्राप्यते तदा निश्चितं तदुद्देशेन दानादि क्रियते। तेनेहापि सहजस्वरूपे प्राप्ते सति चिन्तामणिवत् सर्व्वसत्त्वान् तन्मयं करोति। सर्व्वस्वं द्रविणादि त्याज्यं करोति। ईदृशं मार्गमजाननात्। ग्रन्थकारः **सरह** इत्यादिना परिदेवनां करो[38ᵇ]ति।

**जग वाहिअ आलेँ** इति। सर्व्वं जगत् आलेन तीर्थिकादिना वाहितमिति।

**णिअ सहाव णउ लक्खिउ वालेँ** इति। तैर्बालजातीयै र्निजस्वरूपं सहजभावमिदं न लक्षितं। न सद्गुरवः आराधिताः। तदा ते षड्गत्यादिदुःखमनुभवन्ति। एतदेव न केवलं तीर्थिकस्य श्रमणेषु आह।१९

**झाणहीण पव्वजेँ रहिअउ** इति। यदा तेन श्रमणेन सम्यग्ध्यानहीनेन प्रव्रज्यागृहीतविनयादिलक्षणं ग्रिचारक्षणं कृतं वा तेषां फलं न भव[39ᵃ]ति।

कुत आह—**घरहि वसन्तेँ भज्जे सहिअउ।** यदा गृहारम्भादि आश्रमं न करोति तदा व्रतभङ्गस्तेन सर्व्वञ्च चर्य्यादीनां भङ्गः। एक प्रतिज्ञाभङ्गेन च सर्व्वेषां भङ्गः। यथा एकेन पुरुषेण विषभक्षणेन सर्व्वेषु जन्तु[षु] भङ्गं जायते। तच्च एके म्रियमाणे सर्व्वेषां न भक्षितेऽपि विषमरणभयं जायते। तदा यत्किञ्चित्

1. A. **गिच्छिअ।** A. **हत्थेठ,** Ms. reconstructs the whole *pāda*: **णिहिअ हत्थहिअ विअ उ दीसइ,** A. चिन्तामणिः। 2. A. तदुद्देशे। 4. A. ईदृशस्य मार्गस्याज्ञानात्: MS. restores the word after **सरह** as **भणइ।** 7. B. वाहित इति। 8. A. **लक्खिउ** A. निजरूपं। 9. A. सद्गुरु। B. has तदासाङ्गत्यादि for तदाते षड्गत्यादि— The number 19 refers to the stanza following.

11. A. **माणहीण।** A. **पव्वज्जे।** A. विनयादिलक्षण— 14. A. **वसन्ते।** 15. B. आश्रयणाष्करोति। B. सर्व्वञ्चचर्य्यादीना। 16. A. विषभक्षितेन। 17. A. तस्मिन्नेके



भक्षितं तत् सर्व्वं सुपरीक्षितेन भक्षणं करोति। विषतत्त्वं वा अभ्यस्यति। तच्चा[दा]विव सुनिश्चिततया नो चेत् भङ्गः जायते। एवं यत्किञ्चित् व्रतचर्यादि गृह्यते तत् [39ᵇ] सर्व्वं दृढप्रतिज्ञायेति। तस्य च—

**जइ भिड़ि विसअ रमन्त ण मुच्चइ ।**

यदि च दृढविषयसेवारतिं न त्यजति। तदा ग्रन्थकारेण—

**परिआण कि मुच्चइ** इति। तदा अन्यपरिज्ञानेन किमुक्तेन क्षणिकसुखात्यागात्। येन दुःखमनुभवन्ति। अथ विषयसेवापञ्चकामादिना न मुच्यन्ते सति परिज्ञाने। तदा अन्ये शुष्कपरिज्ञाने वाच्ये उक्ते किं न मुच्यते इति यावत्।

**जइ पच्चक्ख कि झाणेँ कीअअ ।**

**जइ परोक्ख अन्धार म धीअअ ॥**

यदि प्रत्यक्षं तदा ध्यानेन किं क्रिय[40ᵃ]ते। यदा इदं परोक्षं न दृष्टं अन्धकारमध्ये किं दृश्यते। अनेन किमुक्तं स्यात्। सर्व्वाणि प्रव्रज्यादीनि व्रतानि किं क्रियन्ते। अन्धकारमध्ये च परलोकफलं अदृष्टत्वात्। अनुमानहेतुना च। किं तत् प्रत्यक्षं ज्ञानमाह—**सरहेँ** इत्यादि। **कड्ढिउ राव।** गुप्तं न कृतं सर्व्वलोकेषु मयातिव्यक्तेन महानादोच्चारितं। किं तत्। **सहज सहाव ण भावाभाव** इति। अत्र भावश्चक्षुराद्यालोकेन यद्वस्तु मनः परिकल्पनया च। तत्र कुतः। यतः सर्व्वं सहजस्वभावेन वस्तु विश्वमुत्पादितं [40ᵇ] तदेवम्भूतपरिकल्पनया मुच्यते। तथा चोक्तं—

1. B. अभ्यस्यन्ते। 2. B. सुनिश्चितं तया। A. भङ्ग। 3. A. B. **विषय रमन्तन—** A. **उच्चइ।** 6. MS. restores the first part of the *pāda* as **सरह भणइ।** A. अन्यपरिज्ञाने। 8. A. अन्येन सुस्थ परिज्ञानेन। A. मुच्यते। 10. A. **पच्चक्ख झाणेँ कि कीय.** MS.—**झाणेँ कि कीअइ।** 11. A. **मुत्त्वा रम वीअअ** MS. **अन्धार मवीअइ।** 12. A. ज्ञानेन for ध्यानेन। 13. A. has no किं after व्रतानि। 14. A. °फलस्य 15. A. has **सरहे।** MS. restores the word after **सरहेँ** as **नित्त।** A. **कढ़िउ** for **कड्ढिउ।** 17. A. °चक्षुरादि। B. °लोकेनं (?)

नापनेयमतः किञ्चित् प्रक्षेप्तव्यं न किञ्चन ।
द्रष्टव्यं भूततो भूतं भूतदर्शी विमुच्यते । इति ।

तत् कथं युक्तिराह । इदं तद्विपदाः सुखेनोत्पन्नाः । सुखमिच्छन्तश्च मातृपितृ-संयोगाज्जायन्ते । तत् प्रत्यात्मवेद्यतया नाभावः । कुतः तन्मयत्वेनावाच्यत्वात् च । सैव मरणान्तिकं सुखमिति भावः । अतएव—

**जल्लइ मरइ उवज्जइ वज्झइ**
**तल्लइ परम महासुह सिज्झइ ॥** इति

येन सुखेन म्रियन्ते तेनैवोत्पद्यन्ते उत्प[41ᵃ]न्नाश्च तस्मिन्नेव बध्यन्ते । प्राकृत[सुख] कल्पनया च । स च तेनैव सम्यक् गुरु[पदेशं] परिज्ञाय गृहीत्वा परममहासुखं सिध्यतीति भावः । एवं **सरह** इत्यादि सुबोधं । अस्य प्रति-निर्देशमाह—

**झाणरहिअ कि कीअइ झाणेँ ।**
**जो अवाअ तहिँ काहि वखाणेँ ॥** इति ।

अत्र प्रथमं तावज्ज्ञानं वाच्यवाचकलक्षणादिरहितं । तत् किमिदं सहजं ज्ञानं कल्पिततया किं क्रियते । हेतुरहितत्वेन फलव्यवस्था नास्ति । तस्मात् यदवाच्यं तत्र किं व्याख्यानं क्रियत इति यावत् । तथाचोक्तं—

1. A. नापमेयं च यत् । B. प्रक्षेप्त' न (?) 2. B. भूततोभूं तं । B. वमुच्यत । 3. A. तदा तद्विपदादायः । B. सुखमिच्छता च । A. मातापितृ- । 4. B. जायते । A. न भावः । A. has no of after वाच्यत्वात् ।

6. A. has no **वज्झइ** after **उवज्जइ** । 9. B. omits सुख after प्राकृत and उपदेशं after गुरु । MS. restores the last two *pādas* as :

**सरहेँ गहण गुहिर भास कहिअ ।**
**पसुलोअ निव्वोह जिम रहिअ ॥**

13. A. **अवाच** for **अवाअ** । A. **काइ** for **काहि** । A. **वक्खाणेँ** । 15. A. हेतु-रहितेन । B. यस्मात् for तस्मात् ।



इति तावत् मृषा सर्व्वं [यावद्] [41ᵇ] यावद्विकल्प्यते ।
तत् सत्यं [तत्] तथाभूतं तत्त्वं यन्न विकल्प्यते ॥ इति

किन्तद् भवतीति पुनरप्याह—

रूपमस्य मतं स्वच्छं निराकारं निरञ्जनं ।
शक्यञ्च नहि तज्ज्ञातुमबुद्धेषु कथञ्चन ॥
बुद्धोऽपि न तथा वेत्ति यथायमितरो जनः ।
प्रतीत्य तां तु तस्यैव तां जानाति स एव हि ॥ इति

तस्मादज्ञानवृते न लक्षितं तत्त्वं । किमज्ञानमेतदित्याह—

**भव मुद्दे सअल हि जग वाहिउ**
**णिअ सहाव णउ केणवि साहिउ ॥** इति ॥

भवमुद्रया सकल जगद्वाहितं । भवमुद्राङ्केनाकल्मषहृदया सत्त्ववञ्चिका [42ᵃ] च । तया जगद्दासीकृतं यदिच्छति प्राणातिपातादि तत् सर्व्वं कामलोभेन कारयति । तया च कृतमुन्मत्तवत् । तस्मात् निजस्वभावं सम्यक्तत्त्वं न केनचित् साधितं भवति । अन्यच्च मन्त्रतन्त्रादिदेशनया द्रव्यलोभेन जगन्मोहितं । तमाह—

**मन्त ण तन्त ण धेअ ण धारण** इति । एतेन ग्रन्थकारेण करुणाव-शादुक्तं मन्त्रतन्त्रेण रहिततया मोक्षं न लभ्यते । तैः

**सव्ववि रे वढ़ विब्भमकारण ॥** इति हे मूढ़ सर्व्वभवेषु विभव-कारणं सम्पत्तिकारणं—विभ्रमं । येन भ्रान्त्या दुःखमनुभवन्ति [42ᵇ] तस्मात् ।

1. A. मृषावचन HS. मृषावाक्यं for मृषा सर्व्वं । B. omits one यावत् । 2. B. तत् effaced in B. B. तत्त्व । A. विकल्प्यत । 4. A. शश्वत् for स्वच्छं । 5. A. ज्ञातुमद्धेन । 6. A. नरः for जनः । 7. B. प्रतीत ।

8. A. तस्मादज्ञानवृतेन । 9. A. **मुद्दे** । A. no **हि** after **सअल**, 10. A. **केण विगाहिउ** । 11. B. जगवाहितं । B. मुद्राङ्केन— A. no च after सत्त्ववञ्चिका ।

13. A. निजस्वभाव-सम्यक्तत्त्वं । 16. A. no इति after **धारण** । 18. MS. corrects **वट** as **वढ़** । A. **विब्भमकरणँ**, 19. A. विभ्रमः ।

**असमल चित्त म झाणोँ खरड़ह** इति निर्म्मलचित्तं मा अज्ञानेन तावच्छ्रीकुरु। कथं तन्निर्म्मलमुच्यते। चित्तसंज्ञा द्विविधा लौकिकी लोकोत्तरा च। यल्लौकिकं तद्विकल्पलक्षणं पूर्व्वं निराकृतं। यल्लोकोत्तरं निर्म्मलं धर्म्मकायलक्षणं सहजस्वरूपं वा। अतएव आह—

**सुह अच्छन्त म अप्पणु झगड़ह** इति।

एतेन निर्व्विकल्पसुखरूपं सर्व्वं त्रैधातुकं व्यवस्थितं। तदा न पृथक्त्वेनात्मनो पराभवो कुरु। तदा सुखमयत्वेन दृढं कुरु। किं तदाह—

**खाअन्तेँ** इत्यादि च [43ᵃ] **उभअ लोअह** पर्य्यन्तमिति। एतेन च सप्रपञ्चचर्य्यापि सूचिता भवति यदा इन्द्रभूतिपादेन कृता। खाने पाने न पञ्चकामोपभोगेषु सुरतक्रीड़ा। पुनरपि पद्मभाजनादिना गृहीत्वा बलिं दास्यति। महाचक्रदेवतारूपेण स्थास्यति। एतेन भव्यलोकानां ज्ञानसिद्धिर्महामुद्रासिद्धिर्भविष्यति। तैश्च तीर्थिकादीनां। बहुभयभवलोको मस्तकेषु पादन्यासं करोति। वैनेयं करोति। एतेन महामुद्रा या साध्यते तस्याः किमुद्देशमित्याह—

---

1. A. **झाणइ खरतह** MS. **झाणहि खरड़ह**। 2. A. गवच्छीकुरु। 3. A. पूर्व्वँ।
4. A. सहजस्वरूपत्वा[त्]।
5. A. **अप्यणु** MS. **अप्पणु**। 6. A. **जगतह** MS. **जगड़ह**। A. no इति at the end of the pāda. A. सुखस्वरूपं। A. त्रैधातुक—
8. A. **खायत्तेँ**। A. **भअ**; B. **उभूअ (?)**। MS. restores the whole stanza as:

खायन्ते [पिवन्तेँ सुह रमन्तेँ
नित्त पुणु पुणु चक्क वि भरन्तेँ
अइस धम्मेँ सिज्झइ परलोअह
नाह पाएँ दलिअ] भअ लोअह।

10. A. पञ्चकामोपभोगसुरतक्रीड़ा। 11. A. has च after एतेन। 13. A. has no या after महामुद्रा।



**जहि मण पवण ण सञ्चरइ रवि ससि णा[43ᵇ]ह पवेस।**
**तहि वढ़ चित्त विसाम करु सरहेँ कहिअ उएस।** इति

यत्र सर्व्वजन्तुषु स्वरूपं स्वसंवेदनतया गुरोरादेशात्। नैस्थितेष्वपि चित्तविश्रामं कुरु यत्र महत्त्वं प्राप्स्यति। तस्मिन् स्थाने मनसः पवनस्य च सञ्चारो न भवति। तत्रैव रविशशिनोः प्रवेशनिष्काशौ न स्तः। नतु कल्पनामात्रं तत् तु सर्व्वं निरुद्धा भवन्ति। यथा बालैः सन्ध्याभाषमजानद्भिर्मनपवनादिनिरोधमाश्रयः कल्पितः तत्र कथमिहोच्यते। निरोधो नाम निषेधवाचो। किन्तेन कष्टचर्य्यया। यावच्छरीरं वायूादि [44ᵃ] वाहनं भवति तावत् वायुनिरोधेन शरीरं निरोध्यते म्रियते वा। तस्मात् सद्गुरूपदेशात् बोद्धव्यं। सरहेत्यादि सुबोधं। किन्तु पवनरूपं बोधिचित्तं। तदास्मृतं मनः सुखरूपं एवं रविशशिरागविरागोऽनयोः कल्पितसहजा यत्र न भवति ग्राह्यः एवमुपदेशे प्राप्ते सति।

**एक्कु करु** इत्यादि **फुड़ पुच्छहि गुरु पावा** इति पर्य्यन्तं सुबोधं।

---

1. A. **मन, पवन, न, शसि, नाह, पवेश,** MS. **नाहि** for **नाह**। 2. A. **सरहे,** A. **उवेश,** B. **उएश**। The verse is quoted also in the commentary of the Caryās, HS. p. 15. 3. A. स्वरूप— A. चित्तविश्रावं। 4. A. पवनस्य सञ्चारो। 5. A. रविशशि। A. has **नाह पवेस** इति after रविशशि। A. कल्पनामात्र सर्व्वं। 6. A. सन्ध्याभाष- 7. A. निरोधाश्रयः। 8. A. वार्यादिवाहनं HS. वायूादिवाहनं। 9. A. तस्मात् गुरुपदेशात्। 11. A. रागविरागेण यो HS. विरागेण यः। A. कल्पित सहजः स यत्र। B. कल्पितसहज जायच। A. न भवति स ग्राह्यः। 12. A. **फुत** for **फुड़**। A. has **याव** after **गुरुपाव** which seems to be a repetition of the misreading of **पावा**। Four stanzas are omitted here which MS. reconstructs:

एक्कु करु[रे मा करु वेन्नि जाने न करह विस।
एहु तिहुअण सअल महाराएँ एक्कु करु वस॥
तहिँ आइ न मज्झ न अन्त नउ भव नउ निव्वाण।
एहु रे परम महासुहे नउ पर नउ अप्पाण]॥
अग्गेँ पच्छेँ [दह दिहहि जो जो दीसइ तत्त सोइ।
अज्जहि तइसो भन्ति मुक्क एव्वे मा पुच्छ कोइ]॥
इन्दिअ जत्थु विलोअ गउ [तुट्टिअउ णिअ सहाव।
तत्थु रे सहि सहज काअ] फुड़ पुच्छहि गुरुपाव॥

किन्तु सव्वमुपदेशैर्व्याप्तं। तेन तत् कुर्य्यात् सर्व्वं तन्मयितिभावः। यदि भ्रान्तिमस्ति कदाचित् तदा पुनरपि [44b] गुरूपादस्यान्तिकं स्फुटतरत्वेन पृच्छां कुरु येन निर्भ्रान्तो भविष्यसि। तदा तेनापि स उपदेशो दीयते। तमाह **जहि मण** इत्यादि।

**जहि मण मरइ पवण हो क्खअ जाइ।** इति यत्र हि मनो म्रियते पवनश्च क्षयं याति। न केवलं तद्द्वयं अन्यच्च।

**एहु से परममहासुह रहिअ कहिम्पि ण जाइ।** इतीदं वचनात् साधितं। परममहासुखसमापत्या येन प्राप्तश्च। तदपि रहितं सम्यक् गुरूपदेशं विना। [45a]वाच्यवाचकाभावं तस्य कथं तत्वेपि न किञ्चिद्भवति। किन्तु **रहिअ** इति न स्थितं। **कहिम्पि ण जाइ** न गतं क्वचित्। वचनं वचनगम्यं न भवतीतिभावः। <u>तथाचोक्तं</u>—

बुद्धेरगोचरतया न गिरां प्रचारोद्गारे गुरुप्रथित वस्तु कथावतारः।
तत्तु क्रमेण करुणादिगुणावदाते श्रद्धावतां हृदि पदं स्वयमादधाति॥

अत्रैव—**सअसम्विति म करहु रे धन्धा**
**भावाभाव सुगति रे वन्धा॥** इति।

---

1. B. उपदेशैर्व्याप्त'। A. भ्रान्तिरस्ति। 2. A. omits कदाचित्। A. °अन्तिके। 3. A. निभ्रान्ता HS. निभ्रान्तो। A. भविष्यति HS. भविष्यसि। A. तेनाप्यियमुपदेशो HS. तेनाप्ययमुप°। A. **मन**; 5. A. अत्र for यत्र।

7. A. B. apparently takes this to be the second pāda of the verse beginning with **जहिमण मरइ** etc. MS. shows from Tib. that this should form a second verse which he recenstructs as:

**एहु से परम महासुह रहिअ**
**[सरहेँ कहिअउ] कहिम्पिण जाइ।**

9. A. गुरूपदेशं यदि करिष्यसि for गुरूपदेशं विना। B. वाच्यवाचकाभाव। 10. B. **कहिपि** A. **न** A. न गमनं for न गतं। 11. A. तथाचोक्त। 12. A. प्रचारोद्गार HS. प्रचारोद्गारौ। 13. A. श्रद्धावता; HS. श्रद्धावतो। 14. A. **सइ सम्विति।** 15. A. **सुगतिरिव,** MS. **सुगतिचेव।**



स्वसंवित्तिमनादिकल्पनया सुखं मा करिष्यसि। यदि करिष्यसि धन्धतां यास्यसि। तस्माद् भावं वा उक्तलक्षणं अभावं वापि सुगति[45b]र्वा विकल्पितं हे मूढ़ सर्व्वं तत् बुद्धत्वं न सम्भवति। नास्तिसुवर्णलोहनिगड़योर्भेदः तस्मात् त्याज्यमेवेति। <u>तथाचोक्तं</u>—

परमार्थविकल्पेऽपि नावलोयेत पण्डितः।
को हि भेदो विकल्पस्य शुभेवाप्य शुभेऽपि वा॥
नाधारभेदात् भेदोऽस्ति वह्निदाहकतां प्रति।
स्पृश्यमानो दहत्येव चन्दनैर्ज्वलितोऽप्यसौ॥

एतेन किं क्रियतां इत्याह—

**णिअ मण मुणहु रे णिउणेँ जोइ**
**जिम जल जलहि मिलन्ते सोइ॥** इति।

निपुणं मनो निर्म्मलं भावाभा[46a]वरहितं प्रभास्वरमयं वा द्रक्ष्यसि। हे युयं योगिनः निपुणेन योगेन च योगश्च चित्तवृत्तेरेकाग्रलक्षण' ज्ञानज्ञेयलक्षणं वा स च यादृशं जलस्य जलं मिश्रितं तादृशं स भवति योगं भवति चेत्।

**झाणेँ मोक्ख कि चाहुरे आलेँ**
**माआजाल कि लेहुरे कोलेँ** इति।

अलीकेन ध्यानेन केशोण्डुकाद्याभासेन हे मूढ़पुरुष कि मोक्षमधिगच्छसि। तस्मात् तं तयो दुरतिक्रमं। कुतः। मायाजालं समस्तं त्रिभूवनं किं गृह्यते स्वाङ्गोत्सङ्गेषु। न पार्य्यते इति[46b]यावत्। किन्तु—

---

3. A. तदन्वनं भवति for तत् बुद्धत्वं न सम्भवति। 5. B. नावलीयेत्। 5. B. पृश्यमानो। B. चन्दने ज्वलित्येप्यसाविति। 9. A. क्रियते। 11. A. **जलहिं** MS. **जलहिँ।** A. **मिलन्तेइ** MS. **मिलन्ते होइ।** 12. A. द्रक्ष्यति। 13. B. त्वया योगिनः (?) for यूयं योगिनः। 14. A. omits योगं भवति which B adds in a marginal note. 15. A. **झाने** A. **राहुरे।** 17. A. केशोण्डुकाद्याकारेण। 18. A. omits तं तयो। A. दुरतिक्रम।

वरगुरु-वअणेँ पड़िज्जहु सच्चेँ
सरह भणइ मइ कहिअउ वाँचे॥ इति।

यदि तावत् गुरुवचनस्य सत्यतास्ति। तदा मया सरोरुहप्रवरगुरुवचनेन कथितमिदं दोहाकोषादिम्।

पढ़मेँ जइ आआस विसुद्धो इति।

एवं गुरुवचनस्य प्रतीतिकृते सति यः सव्वभावायासः स विशुद्धो भवति। कुतः—

चाहन्ते चाहन्ते दिट्ठि णिरुद्धो।

यथा दृष्ट्वा चक्षुषा व्यंवलोकनेन निमिषोन्मेषनिरोधेन च यत् दूरतः मरीचिकादि पानीय[47ª]स्य दर्शननिरोधो भवति। तथैव इहापि विचार्य्यमानेन सर्व्वं तन्मयो भवति। नान्यथा किं विचार्य्यत इति। गुरूपदेशासुखोभावसहितः प्रवन्धतः। स च न विकल्पभावनाजालादिवत् यदि वा तेनैव बुद्धत्वं तदा प्रतोत्य तां जनयति। स चान्धकाराभावादालोकवत् छायाभावादातपवत् विशिष्टं निर्म्माणकायोऽत्र जायते। मनोनिरोधेन तु विशिष्टधर्म्मकायस्वभावं भवति। स च सर्व्वमयमिति भावार्थः। न पुनर्मन इति। न किञ्चित् स्यादिति। तत् प्रतीतिं जनयति। प्रतोत्यसमुत्पादत्वाच्च। एवमजान[47ª]तामाह—

1. B. वरु। A. वरगुरुवअणे। A. पत्तिजह। A. मथेँ which MS. corrects as सच्चेँ। 4. A. दोहाकोषादिना। 5. A. पडमे for पढ़मे। A. विशुद्धो। 6. B. सर्व्वभवा विशुद्धो। A. सर्व्वभावायासः स(श) विशुद्धो। 7. MS. corrects चाहँते चाहँते। A. दिठ्ठि निरुद्धो। 8. A. मरीचिजालादि। 9. A. तथा इहापि। 10. A. °सुखीभावं सदिते (?) which HS. corrects as °सुखीभावं सदिति। 12. B. सचान्धकाराभावालोकवत्। 13. A. कायस्वभावं HS. कायस्वभावो। 14. B. न पुनर्मयः। A. किञ्चित्यादिति HS. किञ्चित्स्वादिति। 15. A. प्रतीतिञ्च। A. °समुत्पादाच्च।



एसेँ जइ आआस विकालो।
णिअमण दोसेँ ण वुज्झइ वालो। इति।

ईदृशं यदि आयासानां विकालो नोत्पादकालः सर्व्वेषां संहारकालमितिभावः। तदा णिअमण भावासक्तदोषतया न विदन्ति। बालजातोयाः तोर्थिकाद्याश्च। एतदाह—तेनेह सह वेदान्तेनैव सांख्याः चपणका मता विप्रलब्धा बुद्धयो विदिताः विदितपरमार्थदृढ़चित्तं प्रपिण्डैरकात्मदृष्ट्याभिनिविष्टाः। अप्राप्तविनयकालतया च महाकारुणिकैरप्युपेक्षिताः भूयः संसारग्रन्थिमेव दृ[48ª]ढ़यन्तोऽनुकम्पनोया एव। करुणाशालिनां विपदि वर्त्तमाना इति न द्वेषार्हाः। ये तु सौगतनैत्रिकाः तेऽपि वस्तुधियः(?) सांसारिकनैर्व्वाणिकपक्षाववोधपटवो न स्वाख्यातसिद्धान्तानुगबुद्धिभिः प्रतार्य्यन्त इति विस्तरः। तस्मात्—

अहिमाणदोसेँ ण लक्खिअ तत्त। इति।

मिथ्याज्ञानाभिमानदोषैस्तत्त्वं न विज्ञातं।

तेण दूसइ सअल जाणु सो देत्त। इति।

सदोषतया दूषितं भवति सकलं यानं मार्गश्च तैः। आदैत्यपुरुषवत् [48ª] अनेन…

झाणेँ मोहिअ सअल वि लोअ इति। सर्व्वलोकः स्वयानं तोर्थिकादीनां यानमेवेति। इदं—

णिअ सहाव णउ लक्खइ कोअ इति। निजस्वभावं सहजसर्व्वकालमवस्थानात्। स न लक्षितः केनचित् लोकेनाज्ञानात्तेनेति ग्रन्थकारः परिदेवनां करोति। पुनः—

1. A. एसे। A. विकलो। 2. A. दोष। 3. A. संहामिकाल- HS. संहारकाल- 4. A. निअमेण HS. नियमेन। B. नियमेन। 5. A. शाख्या HS. शांख्याः। A. मतविप्रलब्ध- 6. A. प्रपिण्डैकात्म- 7. A. °पेक्षिता। A. ग्रन्थमेव। 9. A. वस्तुधियः B. चस्तधियः (?) A. omits नैर्व्वाणिक। 10. A. पर्थ्यन्त, HS. पव्यन्त for प्रतार्य्यन्त। A. तष्मात्। 11. A. दोषे। A. लाक्खिउ तत्त्व। 13. A. जानइ MS. जनइ। A. दत्त। 14. A. तैश्च (च) दैत्यपुरुषवत्— 15. A. स्वयानं। 18. B. लक्षितं।

चित्तह मूल ण लक्खिअउ सहजेँ तिण्ण वि तत्थ ।
तहिँ जीवइ विलअ जाइ वसिअउ तहि फुड़ एत्थ ॥

इति । अनेन स्थिरमुपदेशं दृढ़ापयति । चित्तह इति चिन्ताया उपदेश[49a] स्यैकं । तथा मूलं न लक्षितं यद् गुरूणां वचने न स्थापितं द्वितोयं । सहजस्य स्वभावरूपं लक्षकेण लक्षितं । एवं तत्त्वत्रयं लक्ष्यलक्षणलक्षकं वितथं अतथ्यं । यदि गृह्यते तदा सर्व्वं चित्तचैतन्यरूपका भवन्ति । एतेनोपदेशस्य सत्ता न स्यात् । तस्मिन् स्थाने वीरपुरुषा जीवन्तः सूराः विरला योगिनः जायन्ते । तस्मात् हे पुत्र ईदृशेषु स्थानेषु वसितव्यं । तस्मिन् सर्व्वधर्म्मा निलीनाः कार्य्याः स परमार्थं इत्युच्यते । तदेवाह—

जयति सुखराज एकः कारण[49b]रहितः सदोदितो जगतां ।
यस्य च निगदनसमये वचनदरिद्रो बभूव सर्व्वज्ञ ।

इति एवं—

मूलरहिअ जो चिन्तइ तत्त ।
गुरुउवएसेँ एत्त विअत्त । इति ।

यः कश्चित् मूलरहितं तत्त्वं चिन्तयति । गुरूपदेशेनैतत् पुरुषरत्नैर्विदितं तत्त्वमिति । विदितं गुरूपदेशं अस्तव्यस्तमार्गयानि सिद्धं ।

---

1. A. न, तिन्न । 2. B. जइ । A. तहि हत ग्रन्थँ—MS. तहिँ हे पुत्त । B. has तहि फुड़ (?) एत्थ, but फुड़ may be read as फुत । 3. B. उपदेशास्यैका- 5. A. omits लक्ष्य- 7. A. शूराः । A. has क्वचित् before विरला । A. योगिनो । 13. A. चित्तइ which HS. corrects as चिन्तइ । A. 14. एत विअत्त । 15. A. मूलनहितं HS. मूलरहितं । A. चित्तयति HS. चिन्तयति । B. गुरुपदेशे मैतत् । A. न विदितं for विदितं । 16. A. अस्तव्यस्तेपि मार्गयायिने सिद्धं, HS. -मार्गयायिनी- ।



सरह भणइ वढ़ जाणहु चंगे ।
चित्तरुअ संसारह भङ्गे । इति ।

एतेन ग्रन्थकारः स्पष्टार्थं वदति । यः कश्चित् चित्तरूपभावना सा संसारस्य भयहेतुका भवेत् । तदा उक्तः । [50a]गुरूपदेशेन तत्त्वं लक्ष्यते दृढ़निश्चयेन यः चित्तरूपः । संसारश्चित्तमयो वा तस्य भग्नो सम्भवतोति भावः । तस्मात् तत्त्वं—

णिअ-सहाव णउ कहिअउ अण्णेँ ॥ इति ।

निजस्वभावं स्वयम्भूस्वरूपं नान्येन कथितं तोर्थिकादिना । तदा केन सद्गुरुणेत्याह ।

दीसइ गुरु-उवएसेँ ण अण्णेँ ॥ इति ।

मया सरहेण दृष्टं सद्गुरूपदेशेन सौगताश्रयेन नान्यनेति । गुरूपदेश-चक्षुषावगतं । परिभाषितुं यत् तन्मूकोऽस्मिन्निति । ईदृशं यस्यास्ति तस्य गुणमाह—

णउ तसु दो[50b]सजे एक्कवि ठ्ठाइ ।

न तस्य दोषस्य एकं स्थानमस्ति । येन—

धम्माधम्म सो सोहिअ खाइ । इति ।

गुरूपदेशेन धर्म्माधर्म्मं पूर्व्वोक्तलक्षणं शोधनीयत्वात् च । शोधितं भक्षणं करोति । अस्यैवोपचारमाह—

---

1. B. जाहु for जाणहु । 2. A. has no इति at the end ot the *pāda*. 3. B. स for सा- A. संसारभय- । 4. B. लक्ष्यति । 5. A. ये चितरूपाः । A. संसार चित्त[ं] माया । A. has तस्य न for तस्य भग्नो । 10. A. उअएसेँ न अणाँ 11. A has no दृष्टं after सरहेण । 12. A. -चक्षुषावगत परिचितं for -चक्षुषावगतं परिभाषितुं । A. मूकोऽस्मि मिति, HS. मूकोऽस्मि इति । 14. A. ठाइ for ठ्ठाइ । 15. A. दोषस्य स्थानमस्ति । 17. B. सामोतिहअ (?) for सोहिअ MS. सो सोहिअ । A. सोधोनीयत्वात् सोधितं ।

णिअमण सव्वेँ सोहिअ जव्वेँ । इति ।

एवं अमनसर्व्वधर्म्माः स्वभावोत्पन्ना नोत्पादिताः केनचित् । यथा तृणवनगुल्मादयः स्वभावेनोत्पन्ना विलयं यान्ति तद्वदिह द्विपदचतुष्पदादयः स्वभावेनोत्पन्ना निर्म्मना विलयं यान्ति हि न केनचिदुत्पादिता भवन्ति । तत्कथं[$51^{a}$] दृश्यते । उत्पपादादि मया कृता इमं रूपादयः । भ्रान्त्याऽज्ञानिनां वचनमेतत् । तत्परित्यागात् यस्मिन् क्षणे तस्मिन्नेव क्षणे सर्व्वधर्म्मशोधनं । तन्नयत्वाच्च भक्षितं भवति—

गुरुगुण हिअए पइसइ तव्वेँ ॥ इति ।

गुरुणा दत्तोपदेशगुणश्च स्वहृदये प्रविष्टं तत्र शोधनभक्षादिकालेषु कायादि सर्व्वं ददातीति प्रत्ययात् । न पुनर्गुरूपदेशं विवदन्ति न किञ्चित् ददाति ग्रहरूपत्वात् न वेत्तीति भावः ।

एवँ मणे मुणि सरहेँ गाहिउ ॥ इति ।

ईदृशं मनसालक्षितं मनलक्षितं । [$51^{b}$] अथवा एवमनेन मुनिर्भगवान् परमार्थरूपकं सरोरुहवज्रपादेनोक्तं । धर्म्मधातुलक्षणं न पुनः शशविषाणवत् न किञ्चिदमनं । तथा<u>चोक्तं</u>—

सावस्था काप्यविज्ञेया मादृशां शून्यतोच्यते ।
न पुन लोकरूढ़ेव नास्तिक्यार्थानुपातिनो ॥
नास्तितारूपमेवास्य व्यवहारार्थमस्तिता ।
निःस्वभावेषु धर्म्मेषु कस्य चास्तित्वनास्तिता ॥

1. A. सवे, जवेँ, MS. सव्वे, जव्वेँ । 2. A. अमनः सर्व्वधर्म्माः । A. केनचित्तु for केनचित् । 3. A. has हि after यान्ति । A. निर्म्मला for निर्म्मना । 5. A. omits इमं । 8. A. दियए, HS. हियए । A. तवेँ, MS. तव्वेँ । 9. A. दत्तोपदेशगुणश्च । A. हृदये for स्वहृदये । 10. B. विदन्ति for विवदन्ति । 12. A. एवमणे MS. एव अमणे । 14. A. परमार्थरूपक- । 15. A. किञ्चिदमन । 16. A. मादृशा । 17. A. लोकरूढेव HS. लौकिकादेव । A. अनुपातिनी । 18. A. नास्ति [स्व]रूपमेवास्य । 19. A. चास्तित्वमास्तिना ।



न स्मर्त्तव्यं त्वयेत्युक्ते स्मरत्येव निपेषितं ।
यथा तथैवासच्छब्दात् सोन्तरं प्रतिपद्यति ।

इति विस्तरः । अथवा यदि वदन्ति अभ्यासात् [$52^{a-b}$] क्लेशावृतमनोविरोधेन विशिष्टं मनो बुद्धत्वरूपं जायते । तदा कथमनेनोक्तेन किञ्चित् स्यात् । सिद्धं परमार्थं मम सर्व्वेषु तदाश्रिता चेति । तन्न भवति कथं तदित्याह—

तन्त मन्त णउ एक्कवि चाहिउ इति । तन्त्रः बहुप्रकारः तन्त्रोक्ता मन्त्रास्तेषु सिद्धान्तं नाना स्वपरकल्पितं । मया एकमात्रं न प्रेक्षितं भाव्यभावकादिलक्षणं । कुतस्तैर्लोकानां वैनेयमात्रं न पुनर्विशिष्टफलं ततो जायते । <u>तथाचोक्तं</u>—

(?) आस्थिमाभ्यासयोगेन आदिशुद्धा स्वभाविका ।
प्रकृत्यैव हि सा सिद्धा तथता न विकल्पजा ॥
अभाव लक्षणाद्बोधिः सर्व्वधर्म्माश्च तन्मयाः ।
अतस्तत् प्रार्थयेच्चर्य्यां निजस्कन्धप्लवोपमां ॥ इति

तस्मात्—वज्झइ कम्मेण जणो कम्मविमुक्केण होइ मणमोक्खँ इति । येन कर्म्मणा जन्तवो विबध्यन्ते तत्परित्यागाधिमोक्षेण च भवति मनोमोक्षं । मोक्षश्चात्मात्मीयविकल्परहिततयाः मिथ्याभावनया मनः संज्ञैव बन्धनात् तस्य निरोध । एवं परिज्ञाने युगपत् मनोमोक्षेति भावार्थश्चाह—

मणमोक्खेण अणूणं पाविज्जइ परमणिव्वाणँ इति । मन [$53^{a}$] मोक्षेति । मनश्च मोक्षं च अनयोरन्योन्यं निश्चितं परस्पररहितं परमनिर्व्वाणलक्षणं प्राप्तिः ।

1. B. स्मरत्येव । A. सात्तर HS. सोत्तरं । Fol. $52^{a-b}$ lost in B. 5. A. आश्रता । 14. MS. wrongly reads मणमोक्खम् । 18. A. मन HS. मनो ; 19. A. मनश्च । A. अनयोरन्योन्य— । B. अनयोरण्यं— ।

**चित्तेक्क सअलवीअं भवणिव्वाणो वि जस्स विप्फुरन्ति** इति। एवं उक्तनिर्व्वाणे प्राप्ते सति तदा कः चित्ते बद्धे सति चित्तात् सकलमविद्यावीजं भवनिर्व्वाणात्मका च अशक्या विस्फुरन्ति। ते भवस्थायिका च न भवतीति यावत्। तस्मात्—

**तं चिन्तामणिरुअं पणमह इच्छाफलं देन्ति** इति। परमनिर्व्वाणस्य विशेषणं। स चिन्तामणिरूपस्तस्य प्रणामं कुरुत। कुत इ[53b]च्छाफलं ददाति इति हेतुना। इच्छा च महाकरुणा जगदर्थात्मिका तां वाञ्छाफलं येन पूरितमनाभोगतः सैव गुरुस्तस्यैति चिन्तामणिस्तथा। एवं—

**चित्तेँ वज्झेँ वज्झइ मुक्केँ मुक्केइ णत्थि सन्देहा** इति। चित्तेन बद्धेन विकल्पादिना बध्यन्ति। पुनरपि तत्परिज्ञानात् मुक्तिं लप्स्यन्ति। एवं वितथः बन्धमुक्त मुक्तबन्धेषु तत्र मुक्तिः। अद्वयेनेति नास्ति सन्देहः। एवमपरिज्ञानात् संसारे विभ्रमन्ति बालजातीयाः पण्डिताः मुच्यन्ते।

**वज्झन्ति जे[54a]ण वि जड़ा लहु परिमुच्चन्ति तेण वि वुहा।** इति। येनैव पञ्चकामोपभोगादिना मूर्खलोका बध्यन्ते तेनैव सति परिज्ञाने गुरोरादेशात् पण्डिता लघु शीघ्रतः संसारात् मुक्ता भवन्ति। तथाचोक्तं—

1. A. वोज्जस्स MS. विजंसि। A. विस्फुरन्ति। 2. A. [व]द्धे नति, HS. [व]द्धे सति। In B the portion which contains चित्तात् is broken but there is no space for more than one letter which might have been हि। 5. B. one may read: **तँ चिन्तामणि रुअँ, पणमह इच्छाफलँ।** 6. A. विशेषण। A. चिन्तामणिरूपं तस्य। 7. A. तेन for इति। 8. A. तद्वाञ्छाफलं। A. येण HS. takes एवं as a part of the *pāda* through mistake. 9. A. **वभ्जइ।** A. **मुक्कइ मुक्केइ।** A. **सन्देहो** MS. **सन्देहो** but rhyme requires **सन्देहा।** 10. A. एव [मव]न्वितः। 12. B. वालजातीयां (?) 13. A. **वज्झंति।** A. **लघु।** A. **परिमुच्चन्ति।** A. **तेनवि वुधा** B. **तेनवि वुहा।**



येनैव विषखण्डेन मृयन्ते सर्व्वजन्तवः।
तेनैव विषतत्त्वज्ञो विषेण स्फोटयेद्विषं। इति तथा

पुनः—

**वद्धो धावइ दहदिहहिँ मुक्को णिच्चल ठाइ** इति। यथा पुरुष आत्मात्मीयविकल्पेन बध्यमानो दशदिशि धावति षड्गतिसंसारे विभ्रमति तथा स एव पुरु[51b]षः सम्यक् मार्गात् मुक्तः तदा निश्चलेनात्मपरिमुक्ते स्थाने स्थितत्वात् धर्म्मकायात्मकः इति भावः।

**एमइ करहा पेक्खु सहि विवरिअ मह्नु पड़िहाइ** इति। समुदायतोऽत्र यथा करभ उष्ट्रः महाभारेण बद्धस्तदा वेगेन धावति धारयितुमशक्तः। स एव भारत्यागात् मुक्तः क्षणे निश्चल एकस्थाने स्थितस्तथा ईदृशं करभमिव स्वकीयं चित्तं साक्षात् विहरति। तादृशं मम प्रतिभासते व्यपदेशार्थान्तलक्षणात् इति।

इदानीमस्य कार्य्यमाह—

**पवणरहिअ [55a] अप्पाण म चिन्तह।**
**कठ्ठ जोइ णासग्ग म वंदह॥** इति।

1. A. मृयते HS. मृयन्ते। 2. A. स्फ ्टयेत्। 4. A. **दिहहिं** MS. **दिहहिँ।** A. **निच्चन** HS **निच्चल।** A. **ठ्ठाइ।** 5. B. आत्मीय— B. दशदिशे (?) B. विभ्रमन्ति ?) 6. A. B. निश्चलेनात्मपरिमुक्ते HS. निश्चलेनात्म°। 7. A. स्थितं for स्थितत्वात्। A. धर्म्मकायात्मकम्। 8. A. **विवरिअ** HS. **विहरिअ।** A. **पड्ड़िहाइ।** 9. A. यदा for यथा। A. करह for करभ। 10. A. अशक्यः for अशक्तः। A. निश्च[ल]श्चैकस्थाने। B, ईदृश। 11. A, स्वकीय। A. विहरन्ति। 12. A, व्यपदेशार्थाः। A, omits इति। Fol, 55a-62b of B. are lost, From the *pāda* **छुड्डइ वेणि-** (infra) I have C, 14. A. **अध्याण** HS. **अप्पाण** MS. **अप्पाण,** 15. A. **कटूजोइणा सग्ग ;** MS, restores: **कठ्ठ जोइ ! णासग्ग** after the Tibetan translation.

पवनेति वायु नासिकाश्वासोत्श्वासलक्षणं तद्रहिततया आत्मानं न द्रक्ष्यति। कुतः। यावत् वाय्वाश्रितं शरीरं तद्रहितेन शरीरस्य कुतः स्थानमस्ति। एवं गुरूपदेशात् वायुस्तन्मयं ज्ञात्वा कुत्रात्मानो न लभ्यन्ते। तस्मात् त्यज कष्टेन योगिन विकल्पात्मकेन तस्याः संगं न क्रियतामिति निश्चयं। किं क्रियते इत्याह—

अरे वढ़ सहजे सइ परज्जह।
मा भवगन्धवन्ध पड़िचज्जह। इति

हे मूढ़ पुरुष अल्पाशयं त्यजसि महाशयं कुरुष्व किन्तत् सहजं गवेषय। तत् प्रवेशे महार्थतया शक्तिं कुरु। मा भवगन्धेति भवस्य गन्ध गन्धर्व्वसत्त्वतया गत्यागतिभावात् यैर्भवबन्धनमलातचक्रवत् भवति तस्मिन् मा त्वं सक्तिं कुरु।

एहु मण मेल्लह पवण तुरङ्ग सुचञ्चल।
सहज सहावे स वसइ होइ निच्चल॥ इति

इत्थं मनः पवनञ्च सुष्ठु चञ्चलमिव तुरङ्गं यथाऽस्य निरन्तरत्वात् तत् त्यज्यं कुरु। इदं ग्राहयिष्यसि। किन्तत् सहजस्वभावस्थानं गुरूपदेशः तेनाश्रितेन साक्षान्निश्चलं भविष्यति। आत्मना ज्ञायते पुण्यादितिवचनात्। अस्य विशेषणमाह—

जव्वेँ मण अत्थमण जाइ तणु तुट्टइ बन्धण।
तव्वेँ समरस सहजे वज्जइ णउ सुद्द ण वम्हण॥ इति

यस्मिन् क्षणे विकल्पमनः अस्तमितं भवति तस्मिन् सर्व्वबन्धनं विनश्यति। न केवलमात्मनो बन्धनमात्रं विशेषेण तस्मिन् काले समरस सहजं वर्जनं सर्व्वलोकानां

1. A, नासिश्वा। 3. A. लभ्यते, HS, लभ्यन्ते। 5. A. वट, MS. वढ़। A. शइ MS. सइ। 6. A. पड़िवज्जह MS. परिचज्जह। 11. MS. [बुज्झह] सो वि सइ for स वसइ। 12. A, यथाऽस्व HS, यथाऽस्य। 15. A. अच्छमण MS. अत्थमण। 17. विनस्यति।



करोति। तया न शूद्रं ब्राह्मणादि जातिविशेषं भवति सिद्धं। सर्व्वं लोका एकजातिनिबद्धाश्च सहजमेवेति भावः। तस्यैवानुसंसामाह—नास्ति सहजात् परं सिद्धान्तमिति। एवं—

एत्थु से सुरसरि जमुणा एत्थु से गङ्गा-साअरु।
एत्थु पआग वणारसि एत्थु से चन्द दिवाअरु॥ इति

एवमस्ति सुष्ठु क्रीड़ा कुतोऽस्ति स्वपरात्म-सहजेन अविच्छिन्नप्रवाहादिति। सैव यमुनागङ्गादिनामा च न पुनः पानीयस्नानाधारतया किन्तु यमुना सर्व्वयान-तदाश्रया च। गङ्गा तत्परिगमनशीला सागरश्च सर्व्वसमाध्यपदेशसमुद्रत्वं प्रयागञ्च अद्वयत्वात् वाराणसी चाद्वयद्वयनिवारणात् चन्द्रदिवाकरौ च राहुग्रहण-तया उपदेशाग्निना सर्व्वं भक्षयेदिति। न केवलं तीर्थादि सहजपीठोपपीठादिषु च। तमाह—

क्खेत्तु पीठ उपपीठ एत्थु इति। एवं क्षेत्रोपक्षेत्रादि सर्व्वं हि चतुर्व्विंशति स्थानानि। स बाह्यभ्रमणकार्य्यमस्ति। स च—मइँ भमइ परिठ्ठओ इति। मया परिभ्रमणस्थापित-योगिन्युपदेशात् बाह्याध्यात्मिकं विश्वं सुखमयमेवेति भावार्थः। एतेन किमुक्तं स्यात्। स्वशरीरं सुखरूपं तस्य धातुः पीठादिरूपतया बाह्येषु प्रवृत्तिः। तेनाह—

देहा-सरिसअ तित्थ मइँ सुह अण्ण ण दीठ्ठओ॥

इति। देहा शरीरसदृशं तीर्थं सुखरूपं यदि भवति तदा सुखं। यदा शरीरसदृशं तीर्थं मया सुखं नष्टमिति तस्मादभिन्नेन विहर्त्तव्यं योगिनेति। एवं पुनराध्यात्मिकेषु पीठादिषु च सञ्चारादिनावगन्तव्यं तेषु च सुखमयेन सञ्चारं न वायुमात्रेणेति। तस्मात् धर्म्ममहासुखमयं पीठादि सिद्धं। इत्थमाध्यात्मिक-पीठादिदेवताधिष्ठानवतो निष्पन्नयोगिनो बाह्यपीठादिभ्रमणमनर्थकं। यथोक्तं—

12. MS. खेत्तु। 13. A. मइ MS. मइँ, 14. A. परिठ्ठवो, 17. A. माइ, MS. मइँ। A. सुहअ ण MS. सुह अस ण।

चतुर्व्विंशति भेदेन पीठाद्यत्रैव संस्थितं ।
अतस्तत्ग्रहणार्थेन खेदः कार्य्यो न तात्त्विकैः ॥
यदि तत्त्वविहीनस्य भ्रान्त्यावेशान्न किञ्चन ।
अथ तत्रोपेतास्ते स्वभ्रान्त्या तेषां न किञ्चन ॥ इति

तस्मादभिन्नरूपमिति निश्चयः। तमाह—

**सण्ड-पुअणि-दल-कमलगन्ध-केशर-वरणालें** इति। दृष्टान्तेन पद्मस्य पृथगभावं त्यज। स न च एकैकस्य पर्य्यायस्य सण्ड यथा पुअणि पद्मपत्रं दलञ्च कमलञ्च गन्धकेशरञ्च वरमुत्कृष्टं नालञ्च। एवं—

**छड्डुह वेणिम ण करहु सोसं ण लग्गहु वढ़ आलें ॥** हे पशुपुरुष उक्तपद्मस्य पृथगभावं त्यजत। एकैकस्य पर्य्यायस्य चित्तशोषं कुरु। तस्मादीदृशस्याज्ञानवाक्यस्य नानाशास्त्रोपचारात् सुखवाह्ये मा लगसि। तथा—

**काम तत्थ खअ जाइ पुच्छह कुलहीणओ ।**
**वम्ह विठ्ठु तेलोअ सअल जहि णिलीणओ ॥**

किं मन्त्रशास्त्रेण सहजवाह्येण पृच्छां कुरु तैर्विना सर्व्वमन्त्रशास्त्रं क्षयं याति। यथा कुलहीनेन पुत्रेणासारेण च पितुरभावात् सर्व्वं यत् किञ्चित् द्रविणादिक्षयं याति सर्व्वं राजादिना गृह्यते। एवं तत्त्वहीनेन सर्व्वमन्त्रशास्त्रं धर्म्मं वा अविद्यागृहीतैः क्षयं याति एवं समुदायार्थः। सहजाकाशवत् त्यक्ता विकल्पनां ज्ञानाश्रयात् नामधेयमात्रं न लभते तथागतोऽन्यस्व। तस्मिन् सर्व्वं क्षयं याति।

9. A. छड़ुहु MS. छड्डहु। A. वेणि म करहु HS. वेणि मण करहु। A. वट। C. [व]ट, MS. वढ़। 12. A. खय, MS. खय, C. खअ। A. C. जाइ, MS. जइ। 13. C. विसहु विट्टु for वम्ह विठ्ठु। A. तहिं त लोअ सहजहि णिलीनओ, MS. तेलोअ सअल सह जहिँ णिलीनओ, C. तहि लोअ सअल जहिअ इविण......(?)



एव कुलपञ्चतथागतादि सर्व्वं हीना भवन्ति। यस्मिन् स्थाने अन्ये च ब्रह्मा-विष्णुमहेश्वरादीनि तस्मिन् सकललोका लीना लग्ना न किञ्चित्तत्त्वविदो भवन्ति। तस्मात् सर्व्वशास्त्रतत्त्ववेदिनस्तैर्विना निष्फला इति। तथाचोक्तं—

चतुराशीति साहस्रे धर्म्मस्कन्धे महामुनेः ।
तत्त्वं ये वै न जानन्ति सर्व्वं ते निष्फला। इति।

अत आह—

**अरे पुत्तो वोज्झु रसरसण सुसण्ठिअ अवेज्ज ।**
**वक्खाण पढ़न्तेहि जगहि ण जाणिउ सोज्झ ॥** इति

हे पुत्र त्वया रसरसायनसाधनकाले स्फूटतरशुद्धिमजानानो यथा नष्टः तथा रागादिशुद्धिमजानानो नष्टः। त्वमीदृशं मा कुरु। रागादभिलषितधर्म्मादिषु क्रीड़ा या सा तत्त्वरहिततया सुष्ठुसंगृहीता अविद्यैवेति। न केवलं तत्त्वं प्रति। अन्ये च लोकाः व्याख्यानं कुर्व्वन्ति पठन्ति च। तेषां सर्व्वं निष्फलं भवति। कुतः। जगत् संसारस्य अज्ञानात्। यः पुनर्जानाति। तस्योच्यते—

**अरे पुत्तो तत्तो विचित्त रस कहण ण सक्कइ वत्थु ।**
**कप्परहिअ सुह-ठाणु वरजगु उअज्जइ तत्थु ॥** इति।

हे शिष्य पुत्र यत् तत्त्वं विचिन्तितं तस्य रसं स्वानुभवकथनं न शक्यते। इदं वस्तुरूपं नीलपीताद्याकारं तद्वत् किं तत् स्वसंवेद्यं यतः "तां जानाति स एव हि" ॥ तस्मात् कल्परहितं सुखस्थानं यस्माच्छ्रेष्ठजगतत्त्वरूपमिति भावः। एवं

7. A. यरे HS. अरे। A. वोज्जु, C. वोज्ज, MS. वोज्झु। A. सुसंठिअ, C. सुसण्ठिअ। 8. C. पड़न्तेहि। A. सोज्झ, C, सेज्झ which is also supported by the rhyme. 14. A. तत्त विचित्त रस कहण ण सकइ वत्थ, MS.—वत्थु। 15. A. वरु जग। A. उवज्जइ। A. तत्थ, MS. तत्थु। 16. A. सिष्य। A, तत्त्व विचित्ततं HS. तत्त्वं विचिन्तितं।

ध्यानेन नोपलभ्यते स्वभावसिद्धत्वात् गुरुपरिज्ञानमात्रेणोपलभ्यते नाभिमानादिना। तदाह—

बुद्धि विणासइ मण मरइ जहि [तुट्टइ] अहिमाण।
सो मात्रामअ परम-कलु तहिँ किम्वज्झइ झाण॥ इति।

एवं गुरुणा दत्त सहजामुखोकरणात् यत्किञ्चित् कल्पितां बुद्धिं विनाशयति विस्मरणं करोति विकल्पमनो म्रियते बाह्यादिवस्तुलक्षणकं न भवति। तस्मिन् स्थाने अभिमानता अहंकार आत्मात्मीयकल्पना त्रुट्यति क्षयं याति। यस्मात् स मायामयपरमकलारूपकं कलेति षोड़शो कलेव नार्थं करोति किञ्चित्। तदिह हि ध्यानबन्धनेन किं कार्य्यमस्ति। मनः परिकल्पिततया नास्तीति यावत्। तस्य विशेषणमाह—

भवहि उअज्जइ खअहि णिवज्जइ।
भावरहिअ पुणु कहि उवज्जइ॥ इति।

यस्मिन् स्थाने भवभक्षितं पुनरप्यत्रैव क्षयविवर्ज्जितं। एवं भावाभावरहितः। भूयः कस्मिन्नप्युत्पादो नोपपद्यते इति यावत्। एतदुक्तेन नास्तिकं न भवतीति। कुतः। यतः बुद्धादिलक्षणं सर्व्वं मायावत् भावाभावमिति प्रसङ्गः। किन्तर्हि कल्पन-योगात् तत् तथोक्तः। एवं पुनः

विस विवज्जिअ जोउ वज्जइ।
अच्छइ सिरिगुरुणाह कहिज्जइ॥ इति।

द्वयवर्ज्जितेषु द्वयेषु योगं मध्यमोपलब्धिविवर्ज्जिभिः परमविरमयोर्मध्यमेनोपलभ्यते इत्याशयः। सर्व्वमद्वयमेवेति। तदपि वर्ज्जनात् तां स्थितिं कुरु। यत्र श्रीगुरुणा शिरसा कथनं कुरु। अत्याश्चर्य्यरूपा शिरश्चालनमेवेति। तस्मादनेन न्यायेन इदं विहरणं कुरु।

3. A. जहि MS. जहिँ; MS. तुट्टइ अहिमान from Tibetan. A. अहिमान। 4. A. मायामय। A. तहि MS. तहिँ। A किम्वज्जइ। 11. A. खअहि C. च्चहि (?) 12. A. कहि उवज्जइ। 17. A. MS. विस। C. वेन्ति (?) A. ज्जोओ। 18. A. अच्छहि। A. C. णाह, MS. णह।



देक्खहु सुणहु परीसहु खाहु।
जिग्घहु भमहु वइठ्ठ उठ्ठाहु॥ इत्यादि।

अत्र यत्किञ्चिच्चक्षुषा द्रक्ष्यसि कर्णाभ्यां शब्दं शृणुति परिधानं वस्त्रादि शरीरं गवच्छसि च सुखेन भक्षणं कुरुवन्ति नाशया सुगन्धं दुर्गन्धं वा जिघ्रसि भ्रमणं वा चंक्रमणं वा करोषि आसने निषण्णोसि उत्तिष्ठसि वा—

आलमाल व्यवहारेँ पेल्लइ।
मण छड्डु एक्काकार म चल्लइ॥ इति।

आलमाल क्रयविक्रयादि तैर्व्यवहारेण कालं कुरुष्व। मनश्चेतदद्वययोगात् न चलं तु अन्यमनप्रष्टा कारणकर्त्तादिना एकाकारस्वभावेन परिभ्रमणं मा करिष्यसि। ते नरकादिदुःखमनुभवन्ति। तस्मात् सद्गुरुपदेशस्मरणं कुरु। तमाह—

गुरु उवएसेँ अमिअ-रसु धावहि ण पीअउ जेहि।
वहु सत्यत्य मरुत्यलिहिँ तिसिए म[63a]रिअउ तेहि॥

गुरूपदेशममृतरसं महावेगेन परिधाविततया यैः कापुरुषैः न पीतं तेन विश्वसत्वार्थं भग्नं। यथा मरुस्थलीषु बहुसंघाततृषितं पानीयरहिततया तत्र सार्थवाहकेन क्वचित् शोष्यस्थानेषु पानीयं दृष्टं तेन कोषदायार्पिता इति मत्वा

1. C. सुणह परीसह। 2. A. जिघाहु MS. जिघाहु। A. उठ्ठाहु। 5. A. व्यवहारे MS. ववहारे। A. MS पेल्लइ, C. वोल्लइ (?) 6. A. MS. एक्कार। A. चल्लइ MS. चल्लइ, C. चालइ। 12. A. उवएसो MS. उवएसइ। A. हवहिँ। 13. A. सत्यत्य MS. सत्यत्य। A. मरुस्थलिहिं MS मरुत्यलिहिँ। A. MS. तिसिए। A मरियउ MS. मरिअउ C. मरिच्चउ (?) 14. A. पीनं HS. पीतं। 15. A. वहुसंघातं तृपिं HS. °तृषितं। 16. B. सार्थहकेन। A. सौघस्थानेषु। कोशीदाया°। A. इतिल्वा[त्]।

सार्थैरज्ञाता तेषु नोक्ततया सर्व्वं संबाधितं भवति। एवं परम्परया सर्व्वसत्वा विनाशिता भवन्ति। उपदेशस्य स्वलक्षणमाह—

चित्ताचित्त विपरिहरहु तिम अच्छहु जिम वालु।
गुरुव[63b]अणेँ दिढ़भत्ति करु होइ जइ सहज उलालु॥

चित्ता ज्ञानज्ञेयादि। अचित्तो निःस्वभावादि। ताभ्यां परिहारं कुर्य्यात्। वालमिव स्थितिं कुरु। निष्केवलं गुरूपदेशस्य दृढ़भक्तिं करोसि। येन सहजस्योल्लापनं भवति। उल्लापनं च निरन्तराभ्यासेन तन्मयं यास्यति। तन्मयञ्च सर्व्वावरणरहितमवाच्यं चेत्याह—

अक्खरवसो परमगुण रहिजे।
भणइ ण जाणइ एमइ कहिअजे॥

इत्यक्षरवर्णाभ्यां स च नोपलभ्यते। अथवाऽक्षरेति परमाक्षरं तस्य वर्णोदं सुखमयाऽग्राह्यख्यानं। एवं उपमारहितवचनपरम्परया न जानीतं [64a] स ईदृशः मया सरोरुहेनोक्तं। तथाचोक्तं—

यावान् कश्चिद्विकल्पः प्रभवति मनसि त्याज्यरूपः स सर्व्वः।
योऽसावानन्दरूपः हृदयसुखकरः सोऽपि संकल्पमात्रः।

1. A. -नैरज्ञातालेषु HS. -नैरज्ञातजलेषु। A. नोक्तं। A. संवादितं HS. संवाधितं। A. परम्परायातरहिततया। 3. C. चित्ताचित्त MS. चिन्ताचिन्त। A. यच्छहु C. अच्छहु। 4. A. दिढ़ भत्ति MS. दिढ़ भत्ति। C. दिह सत्ति। A. करु हइ हइ MS. करु जइ होइ C. करु होइ हइ। A. उल्लालु C. उलालु। 5. A. चिन्ता। A. अचिन्ता। A. कुर्य्याम HS. कुर्य्यात्। 6. A. वालस्येव। A. कुरु। 7. A. सहजस्य लोपी न। उलालनं। 9. वर्णो MS. वसो C. वणो। A. परगुण, C. पमगुण। A. रहिजे MS. रहिये, C. रहिओ। 10. C. भणइ ण जाइ for भमइण जाणइ। A. सोमाइ, MS. सोमइँ, C. से एमइ। A. कहिजे MS. कहिये, C. कहिओ। 11. A. वर्णोद[यं]। 12. A. एवं पमा रहित—HS. एवं प्रमा— for एवं उपमा; Fol. $64^a$—$65^b$ $B_3$ lost.



यद्वा वैराग्यहेतोस्तदपि यदुभयन्तद्भवस्याग्रहेतुः।
निर्व्वाणं नान्यदस्ति क्वचिदपि विषये निर्व्विकल्पात्मभावात्॥

इति तस्मात्—

सो परमेसरु कासु कहिज्जइ।
सुरअ कुमारी जिम पड़िज्जइ॥ इति

भ्रान्त्या यावत् सत्वनिकायः स्थितेपि स परमतत्त्वं परमेश्वरोऽन्यसिद्धान्तभावात् कस्य पृथकजनावस्थितस्य कथयामि हि तत्। कथनमात्रेण तेषु प्रवृत्तिः। किन्तर्हि यथा कुमार्यः सखीभ्यामालोचयन्ति। आलोचयन्ति प्रत्ययं कुर्व्वन्ति। प्रथमतः त्वया स्वामिने गत्वा सुखमनुभूतं। तन्मयि साक्षाद्वदसि निश्चितमेतत्। गत्वा सा पुनरस्य गृहादागत्य सखिना च पृच्छति पूर्व्वोक्तं कीदृशमिति। ता ऊचुः। त्वया साक्षात् स्वामिना सहानुभवकाले ज्ञेयमिति। सुखोत्पादं न किञ्चित् साक्षात् ते वक्तुं अवाच्यत्वात्। तमिव गुरूपदेशन्न पुनः कुमारीसुखमिति वस्तुरूपं प्रतिपादयति। एतदेवाह—

भावाभावे जो परहीणो
तहिँ जग सअलासेस विलीणो। इति

यदि चिन्त्यं परमं तत्त्वं। भावाभावयोः कारणशून्यताद्वयत्वात् रहितो तस्मिन् जगत् सकलाशेषबुद्धवज्रधरादिकल्पितात्मकं विलीनं तन्मयेन निरुपलम्भात्।

जव्वेँ तहिँ मण णिच्चल थक्कइ।
तव्वेँ भवसंसारह मुक्कइ॥ इति

4. A. परमेसुरु MS. परमेसरु C. परमेसर। 5. A. जिमहु पड़िज्जइ, C. जिम उपज्जइ। 14. A. भावाभावे, C. भावाभावेँ। A. परहीणी, C. परिहीणेँ। 15. A. सअलासेस विलीनो, C. सअल असेष विलीणओ (?) 18. A. जव्यँ हि मण MS. जव्वेँ हि मण, C. जव्वेँ तहि मण। 19. A. तव्य MS. तव्वेँ, C. तव्वेँ। A. संसारह, C. संसार हि।

उक्तक्रमेण यदि तत्र मनो निश्चलत्वेन स्थितं आत्मात्मीयादिकल्पनारहितत्वात् तस्मिन् काले भवात् षड् गतिसंसारदोषात् मुक्तो भवति।

अनया कृते सति दोषान्याह—

जाव ण अप्पहिँ पर परिआणसि
ताव कि देहाणुत्तर पावसि॥ इति

यावन्नात्मानं परमोत्कृष्टं तत्त्वरूपं परिजानासि तावत् किं देहस्य शरीरस्य निर्म्माणकायात्मकस्य व्यापकस्य च अनुत्तरं तत्त्वं तद्व्यापकत्वात् प्राप्स्यसि। यस्मादेकानेकत्वमायाति तस्मादात्मग्रहविपर्य्यासात् सर्व्वेषां तादृशं भवति। कस्मादनुत्तरतत्त्वप्रसङ्गादिति।

एमइ क[66a]हिजे भन्ति ण कव्वा।
अप्पहि अप्पा वुज्झसि तव्वा।

ईदृशं मया सरोरुहेनोक्तं तस्य भ्रान्तिं न कदाचित् कुरु। तया भ्रान्त्या च आत्मनात्मानं तदा जानासि। इदं त्यक्त्वा नान्यत् किञ्चिदस्ति। तेनाह—

णउ अणु णउ परमाणु विचिन्तजे।
अणवर भावहि फुरइ सुरत्तजे॥ इति।

न अणुपरमाणवः भावनया चिन्तिताः। अनवरतयोगादिभावने विस्फुरितं वा यदि क्रियते।

4. अप्यहिँ, C. अप्पहु। 10. C. कहिओ for कहिजे। A. भति ण कहा 11. A. अप्यहि अप्या MS. अप्पहि अप्पा, C. अप्पहि अप्पा। A. वुभसि MS. वुज्भसि, C. वुज्भसि। MS. तव्वँ C. तव्वा। 12. B. भ्रान्ति। 14. A. विचित्तजे MS. वि चिन्तये। 15. A. स्फुरइ MS. फुरइ। MS. सुरत्तये। 16. A. चिन्तित: HS. चिन्तिवा:। A. विस्फ ्रितं।



भणइ सरह भन्ति एत विमत्तजे। इति।

एतद्धि मा[66b]त्वं कल्पनात्मकं ज्ञानं। एतेन योगेन विमतिर्भवति। न सम्यक्त्वं हि मया कथितं।

अरे णिक्कोली वुज्झह परमत्थजे॥ इति

अरे मूढ़ पुरुष निक्कोली निर्म्मूलो अकुली च। सर्व्वबीजाधारादिरहितस्तत् परमार्थं वदस्व तमाह—

निर्मूला परचेतन्मा (?) निर्मूला भावनात्मका।
निर्मूलं ज्ञेयसे तत्त्वं अकुला हि तथागता। इति

तस्मात् स्वरूपेण स्फूरते नेच्छया तदासङ्गात् सुरतमिति एवमर्थं—

घरैँ अच्छइ वाहिरे पुच्छइ।
पइ[67a]देक्खइ पड़िवेसी पुच्छइ। इति।

यथा कश्चित् योगिनीनां स्वगृहे स्वजनमस्ति बहिः पृच्छति कुत्र स्थितः पुनः प्रियं स्वामिनं पश्यति समीपस्थं गृहे पृच्छति कुत्र स्थित इति। तथा स्वदेहे तत्त्वं व्यवस्थितं बहिरन्यत् ज्ञानं पृच्छति। अज्ञानमेवेति। पुनः स्वानुभवं गुरोरादेशात् पश्यति अनुभवति। तदा समीपवर्त्ती यः कश्चित् कथं तत्त्वमिति पृच्छति। तेनाज्ञानमेवेति। यदज्ञानं तत् ग्राहणीयं। यतो सर्व्वभावा असंस्कृतास्तत् किं ज्ञायते। एवं [67b] पुनर्द्रढ़ापयति। सरहेत्यादि—

1. भन्ति। MS. एतवि मत्तए। 4. A. णिक्कोली MS. णिक्कोलि MS. परमत्यये, 5. the portion निक्कोली···अकुली broken in B. A. -रहितस्त्परमार्थं, 7. the portion निर्म्मूला परचेतन्मा broken in B; A. भावनांशका। 9. A omits एवमर्थं। 10. A. घरे अच्छ घरे अच्छइ MS. घरे अच्छइ। A. वाहिरे कुइ पुच्छइ MS. वाहिरे गइ पेक्खइ। 11. A. MS. पड़वेसो। 12. A. अथ for यथा। A. स्वजनोस्ति। 13. A. पस्यति। 14. A. अज्ञान सेसेति। 15. A. गुरूपदेशात्। B. पश्यत्वपश्येत्यनुभवति (?) 16. A. तेनाज्ञातमेवे'त। B. स ग्राहणीयं (?)

सरह भणइ वढ़ जाणउ अप्पा ।
णउ सो धेअ ण धारण जप्पा ॥ इति ।

उक्ततत्त्वं तत् सर्वमात्मनैवात्मनि जानीत । स पुन स तत्त्व धेयधारणादिरूपेण जल्पितं ।

जइ गुरु कहइ कि सव्व वि जाणी ।
मोक्ख कि लब्भइ सअल विणु जाणी ॥ इति ।

केनचिदुक्तं भवतीदं यद्गुरुणा कथितं सर्व्वं न तत् सर्व्वं जानीयते । यदात्मनमृते तदा तद्वस्तुरूपमाख्याति । किमशक्यं तस्योत्तरं मोचं किं लभ्यते गुरुणा उक्तं तया व्यतिक्रमेण [68ª] तमजानानतया न जानातीति यावत् । तत् कथं विज्ञेयादभ्यासादिति स चाभ्यासमात्रेनात्मग्रहात् । तमाह—

देस भमइ हव्वासेँ लईजे ।
सहज ण बुज्झइ पापेँ गाहिजे । इति ।

इह कापुरुषयोगिनां दोषमस्ति । स्वस्थानं त्यक्त्वा सर्व्वदेशेषु भ्रमणं कुर्व्वन्ति । भक्ताभक्तादिहेतुना तया कायक्लेशक्लमथं (?) न जानन्ति । कुतोऽभ्यासादिति । तदिदमनुत्तर-सहजं न जानाति न व्यक्तीकरोति । कुतः पापेन गृहीतत्वात् । तत् भक्ष्याद्वैत्यादिति । अभ्यासरहित इति भा[68ᵇ]वः ।

---

1. A. mixes up the two pādas as जानउ अप्पा णउ सो बिअणधारणजन्या—MS. reconstructs the first pāda as सरह भणइ वढ़ जाणउ आप्पा । 3. B. जानात्, A. न पुनस्तत्त्वं धेयनधारणादिरूपेण— 5. A. जानी, 6. A. लव्वइ MS. लव्भइ । A. सअल वि जाणी MS. सअल विजाणी । 7. A. जानीते, B. जानीयते । A. यदा यदात्मना मृण्यते । 8. A. तद्वस्तु आख्याति । A. किमसक्यं HS. (किमशक्यं) । A. तसत्तरं (HS. त-ोत्तरं) । 9. A. तस्य A. व्यतिक्रमी तमजानानतया, B. व्यतिक्रमेन तमननाया । 10. A. विज्ञेयमभ्यासा— A. चाभ्यासमात्रमात्मग्रहात् । 11. A. MS. देश । A. भमइ इह व्वासे MS. भमइ अव्भासे । A. लइजे MS. लइये । 12. A पाप राहिजे MS. पाप लाहिये । 13. A. दोषोऽस्ति । A. सर्व्वं देशेषु । 14. A. तेन कायक्लेशद (क्ल)मथ्वं न जानाति । 15. A नो जानाति 16. HS. भक्ष्यादैत्यादिति ।



तथाचोक्तं—

यथाग्निर्दारुमध्यस्थो नोत्तिष्ठेन्मथनादिना ।
तथाभ्यासादिना बोधिर्जायते नेहजन्मनि । इति ।

अनया यदि तावदभ्यासं क्रियते तदा कथं भावनादीनां परिहारं उक्तं भवतीति आशङ्कात् कस्यचित् स्यात् । तदाह—

विसअ रमन्त ण विसअँ विलिप्पइ ।
ऊअर हरइ ण पाणी छिप्पइ ॥ इति ।

यथा पाणीयमध्ये फेणं दृश्यते न पाणीयं गृह्यते हस्तस्पर्शाच्च एवं तथा सति परिज्ञाने विषयाणां क्रीड़ां करोति पञ्चकामादिना तैर्दोषै नै गृह्यते । [69ª-70ª] पुनर्यथा पद्मपत्रे जलतरङ्गं गृहीत्वा तत् पानीये नै लिप्यते । तदोत्पन्ना च पद्मपत्राभोवदिति वचनात् । एवमभ्यासो योगिनस्य ।

एमइ जोई मूल सरन्तो ।
विसहि न वाहई विसअ रमन्तो ॥ इति

ईदृशेन योगिना मूलं गुरूपदेशसरितोऽभ्यासात् सरन्तो जानन्तो तद्विषयैर्न बाधितो यत्किञ्चित् योगिनां विषयादिरूपं तत् सर्व्वं न जातु तस्य बाध्यका भवन्ति । किं ज्ञानं ज्ञेयं ज्ञापकञ्च तत्प्रभवादिति । तस्मात् सर्व्वविषयाणां रमणात् न बाध्यत इति यावत् । तथाचोक्तं—

बाह्यं यत् तदसत् स्वभावविरहात् ज्ञानस्य बाह्यार्थवत् ।
शून्यं यत् यदकल्पितञ्च विदुषा तत् तदप्यशून्यं मतम् ।
इत्येवं परिभाव्य भावविभवैर्निश्चित्य तत्त्वैकधोः ।
मायानाटक[नाट]नैकनिपुणो योगीश्वर क्रीड़ति । इति

---

2. A. नोतिष्ठेत्— HS. नोत्तिष्ठेत्— 3. B. omits इति । 4. A. अभ्यासः । 5. A. आशङ्का । 6. A. विषय MS. विसअ । A. विसअ । विलिप्पइ MS. °विलिप्पइ । 7. हरइ effaced in B. A. त्थिप्पइ MS. छिप्पइ । 8. A. फेण । 9, 69ª-71ᵇ of B lost.

देव पिच्छइ लक्ख वि दीसइ
अप्पणु मारीइ स कि करिअइ। इति

यदि तावद्देवतारूपेणोत्पत्तिस्तल्लक्षणं साक्षाद्दृश्यते इति तदा आत्मा म्रियते। सा देवता किं करिष्यति। न किञ्चिदिति यावत्। तस्मात्—

तोवि ण तुट्टइ एहु संसार।
विणु आआसेँ णाहि णिसार॥ इति

देवताकारं यद्यात्मानं भवति तदपीदं संसारं न नश्यति। कुतः यतः सर्व्वेषां सत्त्वानां पञ्चोपादानस्कन्धाद्यभावात्। आलयविज्ञाने या प्रवृत्तिः सा च गन्धर्व्वसत्त्वात्मकं। सैव पुनरागतिः पूर्व्वाद्युपलम्भात्। देवता च तादृशविज्ञानेनोपलम्भात्। तस्मात् न नश्यति संसारः। मिथ्याघटीयन्त्रवत् परिभ्रमतीतिभावः। किन्तु तेनैव सति परिज्ञाने तदभ्यासेन विना संसारेषु नास्ति निस्सारः। एतदेवोक्तेन देवताभावेन तावन्न भवति गुरूपदेशं। यस्मादभ्यासः क्रियते। ततो नास्त्यभावस्य विशेषस्तन्न भवति। सम्यग् गुरूपदेशस्य त्वया वार्त्तामात्रं न न श्रुतं किन्तदाह—

अणिमिसलोअण चित्त णिरोहेँ।
पवण णिरुहइ सिरिगुरुवोहेँ। इति।

अनेन यत् कल्पितं कुधियैः कल्पनात्मकं गुरूपदेशं तन्न भवति। यथानिमिषस्तब्धलोचनैश्चित्तं आकाशादिषु निलीनं करोति तेन वायु निरो[71ª]धितं भवति। श्रीगुर्व्वादेशत इत्यादि न भवति। कुत एवमाह—

पवण वहइ सो णिच्चलु जव्वेँ।
जोइ कालु करइ कि रे तव्वेँ॥ इति।

1. A. पिज्जइ, A. लच्च, 2. A. अप्यणु, A. मारीईं, 5. A. तुटइ, 6. A. आयासेँ, HS. आभासेँ, 15. A. अणिमिष- A. णिरोधेँ, 20. A. निच्चलु।



यस्मिन् क्षणे वायुवाहनतया योगी प्राणं निश्चलं करोति किमत्र तस्मिन् क्षणे हे मूढ़पुरुष कालं मरणं करोति। तस्मात् न भवति। कस्मान्न भवतीत्याह—

जाउ ण इन्दीअ-विसअ-गाम।
तावहि विफुरइ अकाम॥ इति।

यावन्नेन्द्रियविषयग्रामः ताभ्यामासक्तिं करोति योगिनस्तावत् न गुरूपदेशं वेत्ति। आस[71ᵇ]क्तिश्च विचारागमयुक्त्या लभ्यते। स चात्मादिवस्तुरूपं न दृश्यते परमार्थादिभेदेन तत् कथं प्रत्यक्षेषु दृश्यते। भ्रान्त्या च भ्रान्तिर्नामालोकं। तच्च सम्वृतिसत्यदर्शनात् मायावत् प्रतिभासते। एवं मायोपमं त्रैधातुकं विश्वं। ततः केन आग्रहः क्रियते। न क्रियत इति यावत्। विशेषेण च योगीन्द्रस्य नेच्छया अपरिभावितेन च गुरूपदेशं स्फुरते तस्यैवाभ्यासेन स्मरणात् क्षपयतीति निश्चयः।

अइसेँ विसम सन्धि को पइसइ।
जो जहिँ अत्थि णउ जाव ण दीसइ।

ईदृशी उक्तलक्षणाया विषमसंसन्धिवचनेषु को पुरुषः प्रवेशं करोति। किमर्थं। यो वस्तु यस्मिन् गुरूपदेशस्य नास्ति यावन्न दृश्यते आत्मादिभावं तावत् किं सा भविष्यति। संक्षेपतः न भाव्यभावकवस्तुरस्ति।

न भाव्यं भावकं वाऽस्ति भावं नास्त्येव सर्व्वतः।
भाव्यभावकभावेन जायते विकृताकृतिः।
तत्त्यागो न तु निर्व्वाणं नेच्छयापि च जायते।
यथा सिंहस्यैतत् ध्यानं नेच्छया दृश्यते क्षयात्। इति

1. A. वायुवाहनततया B. वायुवाहनाया। 2. A. मरण करिष्यति HS. मरणं करिष्यति। B. कस्मात् and omits the न after it. 4. B. इन्दिअ-। 5. A. तासहि फुरइ। A. omits अकाम। 7. B. स चात्यादि-। 9. A. प्रतियास्यते for प्रतिभासते। 13. A. सान्धि। 14. जइ। 15. A. इतीदृश्या। A. सन्धि, HS. संनि-। A. करोति for क्रियते। 15. A. आत्मादि तावत् का सा भवति। 17. B भावा—। 19. A. जायतेति कृताकृतिः। 21. A₃ सिंहस्य तत्।

एवमजानतामाह—

[62ᵇ] पण्डिअ सअल सत्य वक्खाणइ ।
देहहिँ बुद्ध वसन्त न जानइ ।
अवणागमण ण तेण विखण्डिअ ।
तोवि णिलज्ज भणइ हउ पण्डिअ । इति ।

पण्डितैर्नानाशास्त्रेषु व्याख्यानं कुर्व्वन्ति । वागजालमात्रमेव निष्केवलं नरकगमनहेतु द्रव्यार्थितया । देहस्थितं बुद्धत्वं सद्गुरूपदेशमजाननात् न जानन्ति हि । अक्षरमात्रमाश्रित्य स्वरमजाननात् गुर्व्वाम्नायविना व्याख्यानं कुर्व्वन्ति । ते स्वयं नष्टाः परानपि नाशयन्ति । कुतः । अनेकज[73ᵃ]न्मपरम्परया संसारे गमनागमनहेतुत्वात् न विनाशितः । पुनरपि स महानरकादिरूपसंसारे संसरतीति चेत् । तथापि पुनरेतदर्थं कम्बलाचार्य्येणोक्तमाह—

वर्णाः पदानि वाक्यानि लिङ्गानि वचनानि च ।
क्रियाकारकसम्बन्धात् वितथत्वादवाचकाः ॥
श्लोको हि पञ्चभिः पादैस्त्रिभिर्वाक्यानुनीयते ।
वाक्यस्य वाचतत्त्वत्वात् डाकिनीसमयो भवेत् ॥
गृहीतव्येषु धर्म्मेषु विश्वं शून्येषु पुरातनैः ।
पातितः किमसौ लोकः शब्दसं[73ᵇ]सारसङ्कटे ॥
एसा नासैति वक्तव्ये पृष्ठः को नाम दर्शयेत् ।
शिरः प्रदक्षिणावर्त्तं भङ्गुरेणेह पाणिना ॥
शिलापीडकदृष्टान्ते लाघवं गमितं स्वयं ।
शब्दैरात्मा च लोकश्च शब्ददुद्धरराशिभिः ॥

3. A. देहेहि । 4. A. अमणा । A. तेन । 5. A. णिलज्जइ । 6. A. पण्डिता । 7. A. हेतुः । A. -मजानात् । 8. A. -माहत्य । A. -म्नायं । 9. B. तैः । 10. A. -रूपे । 11. A. तथातोपि for तथापि । 12. A. वर्णापरादानि । 13. A. सम्बन्धाः ; वितथस्वाद- । 14. A. श्लोकैः च ; -र्वाक्यो न मीयते । 15. A. वाचकत्वात् । 16. B. विद्वत् for विश्वं । 20. A₂ शिलापीत— । 21. -दुद्द्‌ुर ।



इत्यादि विस्तरः । ततो हि पुनरपि निर्लज्जया भाषितं । अहं पण्डितो मूर्ख एवेति ।

जीवन्तह जो णउ जरइ सो अजरामर होइ ॥

अनेनोक्तमर्थस्य दृष्टान्तः । यदि तावत् क्वचित् पुरुषस्य आजीवमरणपर्य्यन्तेन यदि जरादिना न गृह्यते तदाऽसौ अजरामरत्वं याति । [74ᵃ] एवं न दृश्यते क्वचित् ।

दृश्यते पुनः सर्व्वेषां जन्तवानां ज्वरादिना गृहीतत्वात् मरणान्तं हि जीवितं इत्येकं । द्वितीयं यथा रस जाति-मारित-जारितमात्रेणाष्टलोहान् विन्धति यावत् नातिरसं तथा सत्वान् मरणकालेऽमृतं न जरति यैरजरामरं करोति । आदावेव निर्म्मलमतिर्भक्षणादिना यावत् जरति योगी । केनाजरामरं यातीत्याह—

गुरु-उवएसेँ विमलमइ सो पर धण्णो कोइ ॥ इति ।

यः सद्गुरूपदेशात् विमलमतिना साधि[74ᵇ]तमजरामरत्वं धर्म्मसम्भोगनिर्म्माणमहासुखकायचतुष्टयभेदेन सर्व्वसास्रवाणां निरोधः कृतः । तेन क्रियते नान्येनेति । तस्मात् स पुरुषः धन्यः श्रेष्ठ इति भावः ।

विसअ-विसुद्धेँ णउ रमइ केवल सुण्ण चरेइ ।
उड्डी वोहिअ काउ जिम पलुट्टिअ तहवि पड़ेइ ॥ इति ।

विशुद्धविषयेषु यः कश्चित् गुरोराज्ञया पञ्चकामोपभोगादिना न रमति येनानुत्तरं प्राप्नोति । तद्विरहान्निष्केवलं विषयोपसेवामात्रया शून्यार्थं [75ᵃ] चरति । अथ शून्यमात्रं चरति न किञ्चिदेव साधयति । काकमिव वोहितमाक्रम्य समुद्रमध्यगत उड्डीयमानस्तत्रोत्तिष्ठति अन्यमाश्रयमपश्यन् पुनः

1. A. निर्ल्लज्जतया । 3. A. नउ । 4. A. अन्योक्तम् ; दृष्टान्तं ; आजीवन- । 5. A. तदाहुजारितः सौ for तदाऽसौ । 7. A. जन्तूनां ; जरादिना । B. गृहीतेषु । 8. A. omits रस । A. मारित after जारित । 9. A. omits यावत् नातिरसं । A. -ऽमृत न करोति यैरजरामर । 10. A. यान्ती- । 11. A. धण्णा । 12. A. धम्म- । 13. B. तेन for -भेदेन । 14. A. नान्यमिति । 15. A. विसुद्धे । B. णो for णउ । 16. MS. वोहित्थ । A. पलुट्टिअ तहिँ । A. पतेइ । 17. A. गुर्वाज्ञया । 18. A. has सुण्ण चरेइ इति after निष्केवलं । A. शून्यार्थञ्च । 9. A. has यथा before काक— । 19. A. omits अथ to चरति । 20. B. उत्तीर्य्यं मनया तन्मात् तिष्ठति ।

तत्रैव पततिं। एवं बालजातीयाः संसारकर्म्मणा संसारे पतन्ति। अन्यः शून्य-दर्शनात् तत्राश्रयणादिति तस्मात्—

विसआसत्ति म बन्ध करु अरे वढ़ सरहें वुत्त।
मीण पअङ्गम करि भमर पेक्खह हरिणह जुत्त। इति।

विषयासक्तिं पञ्चका[75b]मोपभोगादिना मा बन्धं कुरु। मया सरहेण यत्नेनोक्तं। यदि करोसि तदा मीनो मत्स्यो अशक्ताकामोदकमिच्छता प्रलयः। एवं पतङ्गो रूपाशक्तः प्रदीपेन प्रलयः। करिणः स्पर्शेण प्रलयः। भ्रमरस्य गन्धेन प्रलयः। तथा मृगयूथस्य शब्देन प्रलयः। स्वयं प्रेक्षतां। किन्तत् सर्व्वेषां राग-पूर्व्वङ्गमेनोत्पत्तितया।

जत्त वि चित्तहि विफ्फुरइ तत्त वि णाह सरूअ।

तेषां यत्र चित्ते विस्फूरितं गमनं भक्षणादि कार्य्यं चिन्तितं [76a] तत्र नास्ति स्वरूपः। अज्ञातत्वादिति। कुतः। लुब्धककैवर्त्तादीनां विसंवादनात् एव कामिकपुरुषाणामज्ञानात् यमकिङ्करादिना मारिता भवन्ति। पुनरपि ग्रन्थकारेणातिकरुणावशादुक्तं—

अण्ण तरङ्ग कि अण्ण जलु भवसम खसम सरूअ। इति।

यथा नद्यां जलं सव तरङ्गो नान्यः तथा भवसमावशुद्धित्वात् शान्तिरूपमेव खसमरूपं नान्यः। एतेन किमुक्तं स्यात्। यो भवः सैव निर्व्वाणं सम्यग् गुरूप-[76b]देशादिति ज्ञानिनां। अज्ञा न जानन्ति विषयं यान्ति। ईदृशं ज्ञानं—

कासु कहिज्जइ को सुणइ एत्थु कज्जसु लीण।
दुट्ठ सुरुङ्गाधूलि जिम हिअ-जाअ हिअहि लीण॥

3. A. विशया- ; वट ; सरहँ। 4. A. पयगम ; भमर। 5. B. सरहेन। 6. A. रसासक्तमाकाशोदकमिच्छति। 7. B. भमरः। 8. A. प्रेक्षता। 9. A. -पूर्व्वगमनोत्-। 10. विस्फुरइ ; सरूव। 12. A. लुवइ for लुब्धक। A. विसंवाद। 13. B. किङ्करा-दिका। 16. A. नद्या जलतरङ्गो नान्यथा भवः शमविशुद्धि- ; 17. A. नान्यथा। 18. A. omits ज्ञानिनां। अज्ञा न। A. ज्ञानि नाम for A. विसयं। 20. A. हिअ जातहिअ व-लीण।



इति। परमगम्भीरं मार्गं कस्याज्ञानिनः कथ्यते। क्व इह स पुरुषः कथन-योग्यः को वाऽस्मिन् कार्य्येषु लीनो निपुण गृहीत्वा तत् पदं यान्ति न क्वचित्तयो पात्रमेवेति। विरलाः ते पुरुषपुङ्गवाः सुपात्राः। यथा क्वचिद्दुर्गभञ्जनाय भूम्यधो दूरतश्च सु[77a]रङ्गा दीयते। तत् सुरुङ्गिकानां गम्यं नान्येषु। कुतः तत्र सङ्कट-खननाय अत्यन्तदुष्टधूलिर्भवति। यैस्तत्क्षणात् मरणं भवति स्वल्पहृदयानां। सुरुङ्गिकानाञ्च दृढ़तरहृदयत्वात् तेषां सा धूलिस्तद्धृदयेषु लीनो भवति। मृत्तिका च भूम्यां लीयते। प्रथमारम्भे किञ्चिद्दाह्यं त्यक्तत्वादिति। एवं पूर्व्वजन्माभ्यासिकानां तेषां महासंसारे च बोधिः सहृदयार्थमेवेति भावार्थः। तद् गुणाण्याह—

जत्त वि पइसइ जलहि जलु तत्तइ समरस होइ।
दोसगु[77b]णाअर चित्तहा वढ़ परिवक्ख ण कोइ॥

यथा यत्र समुद्रेषु जले जलमिश्रितं भवति तत्र समरसतां याति। एवं संसारादिदोषगुणाश्च चिन्तिताः सपरिज्ञानस्य महर्द्धिकस्य पुरुषस्य प्रतिपक्षा न भवन्ति। कुतो दोषाश्च पञ्चकामादिगुणाः। तद्विशुद्धिकरणं नानागुरुवाक्यं [निरन्तरस्मरणात्। यथा नद्या जलं] निरन्तरप्रवाहात्। पुनरस्य स्पष्टतामाह—

सुणहिँ सङ्ग म करहि तुहु जहिँ तहिँ सम चिन्तस्स।
तिल-तुस-मत्त वि सल्लता वेअणु करइ अवस्स। इति।

[78a] निष्केवलं शून्यतासङ्गं मा करिष्यसि येनोच्छेदं भवति। त्वया यत्र तत्र स्वभावेषु वस्तुषु समतां चिन्तय नात्मन्येव। एवं आत्मानञ्च [परञ्च] विश्व-संग्रहमेकतां नाप्यसि [नानात्वाभावात्]। यदि करोसि आदोषं भवति। यथा तिलीयमात्रेऽपि वस्तुनान्तर्गतं। तस्य तुष [मध्ये कुकलङ्कभवति]। तत् सत्यं

1. A. क for क्व। 2. A. निपुणं ; कश्चित् तस्य-। 5. A. अल्पहृदयानां। 6. A. -हृदयात्। B. भवन्ति। 7. A. त्यक्तादिति। 8. B. सपात्रमेवेति for सहृदयार्थ-। 9. A. पइसइ। 10. A. दोषगुणा अर चिर तत्ता वट-। 11. A. समरसता ; omits याति। 14. B. omits the portion within brackets. 15. A. चित्तस्स। 16. A. तिल तु समत्त वि सलत्ता...अवस। 17. A. -च्छेदो। 19. A. omits -मेकतां नाप्यसि। 20. A. omits तस्य। 17-20. B. omits the portions within brackets.

भवति। तेन वेदनामवश्यं करोति। एवं योगीन्द्रस्य शून्यता चित्तमात्रेण मल्यं भवति। न सर्व्वाङ्गेषु सुस्थतां प्राप्यते। यदि तावत् शून्यमशून्यं द्वयमद्वयम्वा न भाव्यते [78b] तदा कीदृशं भाव्यतेत्याह—

**अइसें सोपर होइ ण अइसों।**
**जिम चिन्तामणि कज्ज सरीसों॥** इति।

ईदृशं नीलपीताद्याकारमनुभवरूपम्वा उपलक्षणं भवति। [न तादृशं सोपलम्भनिरूपलम्भचित्ताचित्तकल्पनाद्वयं सर्व्वसाश्रयवीजाधाररहितरूपत्वात् कथं ज्ञायते इति चेत्।] चिन्तामणिरिव कार्य्यसदृशं भवति। यथा चिन्तामणिः सर्वं वस्तु न दृश्यते क्वचित्। पुनस्तेन हस्तगतेन सर्वकार्य्येषु चिन्तां करोति जड़भावाश्च। तथा यो[79a]गिनामपि गुरूपदेशः हस्तगतमणिमिव नेच्छया बुद्धत्वादि साध्यतीति भावार्थः। एवमजानानां पण्डितानां विहरणमाह—

**अक्कट पण्डिअ भन्तिअ णासिअ।**
**सअसम्विति महासुह वासिअ॥** इति।

अक्कट इत्याश्चर्य्ये पण्डितः वर्णमात्रमाश्रित्य भ्रान्त्या विनाशितो। न विनाशितेति यावत्। कुतः। यतः स्वसंवेदनं सर्व्वभावान्तर्गतं समोपलभ्यते। असंवेदनेति यावत्। तया भ्रान्त्या अनेन व्याख्यातेन चित्ताचित्तभावेन इदं स्वसंवित्तिलक्षणं महासुखेषु बाह्याङ्गनास्पर्शेषु भाषितं। पुनरपि तस्यैव बाह्यमहासुखस्य दृढ़तया व्याख्यानमुचुः—

**सव्व रुअ तहिँ खसम करिज्जइ।**
**खसम सहावेँ मण वि धरिज्जइ॥** इति।

2. A. प्राप्नोति। 4. A. **ताइसो** for **अइसों**। 5. A. **कज सरीसो**। 6. B. -मनुभवरूपलक्षणं ; the portion within brackets omitted in A. 8. A. कार्य्यैः for कार्य्यं-। 9. B. पुनस्तया हस्तेन। 10. A. -मणिरिव। 11. A. साधयतीति ; विहरण माह। 12. A. **भन्तिअ नासिअ**। 14. A. इत्याश्चर्य्यं पण्डितैः। A. भ्रान्तिर्नाशिता। A. विनाशितेति। A. -गतसामाय लभ्यते। A. अनभ्याख्यानेन। A. तस्येव। A. स्फुटतरतय for दृढ़तया।



सर्व्वरूपादि विषयं यत् तस्मिन् खसमं क्रियते। मनश्च खसमस्वभावेन धार्य्यते। तदुक्तं—

**सोवि मणु तहि अमणु करिज्जइ॥**
**सहज-सहावेँ सो परु रज्जइ॥** इति।

तथा सोऽपि खसमस्वरूपं मनं तस्मिन्मनं क्रियते। एवं य करोति स उत्तमपुरु[80a]षः सहज स्वभावेषु रज्यते क्रीड़त इति यावत्। एवं

**घरे घरे कहिअइ सोज्भुक कहाणा।**
**णउ परि मुणिअइ महासुह ठाणा॥**

इतीदं कुत्सितधीयैः। गृहे गृहेषु सत्ववञ्चनाय वदन्ति। ईदृशं शुद्धव्याख्यानं येन कथनेन त्वयाद्यप्रभृति शुद्धं भवति। तस्मादन्यदेव-तद्वादिकमपरं श्रेष्ठव्याख्यानं महासुखस्थायित्वमधिगमं कुरुष्व। तस्मात् भङ्गापुराणमेवेति—

<u>तथाचोक्तं</u>—

जलप्रपातानि पदानि पश्यतः
खपुष्पमाला रचनाञ्च[80b] कुर्व्वतः।
असूत्रकं चापि पटं प्रतन्वतः।
कथं हि लोकस्य न जायते त्रपा॥ इति।

कुत्सितानां दोषतया परिदेवनया सरहेत्यादि ग्रन्थकार आह—

**सरह भणइ जगचित्तेँ वाहिअ।**
**सो अचित्त णउ केणवि गाहिअ॥** इति।

1. A. lacuna for यत् तस्मिन्। B. मनश्च। 3. A. lacuna for **सोवि मणु तहि** ; MS. reconstructs as **जो तहिँ सो मण**। 4. A. **स्वभावेँ**। 5. A. मनस्तस्मिन् मनः। 7. A. **कहिटअइ ; कहणा**। 8. A. **णो पर सुणिअ**। 9. A. इदं ; कुत्सितधीभिः ; कीदृशं for ईदृशं ; तत्त्व for शुद्ध। 10. A. सुद्धं ; -तद्वाहिक-। 11. B. महासुखस्थानीयत्वयानादिगम-। A. भङ्गापुराण—। 13. B. प्रज्ञातानि for प्रपातानि। 14. A. पश्यतः for कुर्व्वतः। 15. A. प्रवन्नतः। 16. A. जनायते for न जायते। 17. A. दोषं दृष्टान्तेन for दोषतया।

मूढपण्डितैः समस्तजगन्मूर्खलोकं चित्ताचित्तबहुप्रकारेणोक्तलक्षणया बाहितं दासीकृतं मदीयोपदेशेन तच्चित्तं त्यजसि [अचित्तरूपं प्राप्स्यसि]। न ह्येतत् भवति। कुतः। स अचित्तलक्षणं न केन चित्तविधिना ग्राहितं भवति। कस्मात् [81ᵃ] तर्हि कस्मात् अचित्तरूपस्य काष्ठपाषाणादिषु किं स्वसंवेदनं भवति। एवमचित्तरूपं किं लक्ष्यते। न लक्ष्यते इति यावत्। आदावेव तत् स्वभावत्वात् स च—

एक्कु देव वहु आगम दीसइ।
अप्पणु इच्छेँ फुड़ पड़िहासइ॥ इति।

एकदेवताकारं संज्ञामात्रेण स बह्वागमेषु स्वस्वदर्शनेषु च पश्यामः। सव चात्मनेवेच्छया स्फुटं प्रतिभासते। नान्यः। तथाचोक्तं श्रीमद्धेवज्रे—
स्वयं भर्ता स्वयं हर्ता स्वयं राजा स्वयं प्रभुः इत्यादि। स च—

[81ᵇ] अप्पणु णाहो अस्र वि रुद्धो।
घरेँ घरेँ सोअ सिद्धन्त पसिद्धो॥ इति।

आत्मात्मीयं नेच्छन्तीति विनाशो कुत्सितकल्पनाग्रहात्। पुनरप्यन्येषां भावानां निरोधकत्वात् विरोधोऽयं न स्यात्। स घरे घरे अयं सिद्धान्तं प्रसिद्धं। कुतः। उत्पन्नप्रलयत्वात्। यदि तावत् प्रलयं कस्योत्पादः। अथचोत्पादः किं प्रलयं तस्माद्द्वयोरसत्यं। तेन तत् तथोक्तं। ईदृशं विशिष्टयोगिनामाशयं भवति। कुत्सितं भगवत्यात्मनस्येवं ज्ञानं गुरूप[82ᵃ]देशात्। यस्य नास्ति

1. A. लक्षणेन। 2. B. omits the portion within brackets. A. न हि तद् for न ह्येतत्-। 3. A. omits स। 4. A. यस्य चित्तरूपस्य for कस्मात् अचित्तरूपस्य। 7. A. एकु; अङ्गम for आगम। 8. A. अपणु। 9. A. स्वस्वदरशनेषु; सेव। 10. A. प्रतिभाषते नाना। 12. A. अप्पणु; नाहो। 13. सिद्धान्त। 14. A. नेच्छतीति; विनासो; कुच्छित। 15. A. निरोध- for विरोध-। A. omits अयं। 18. तत्स्थितानां भवत्यात्मन एवं ज्ञानं for कुत्सितं etc.



गुरूपदेशं तस्य न भवति। न हि [82ᵃ] एतद्बुद्धबोधिसत्त्वानां सम्मतः। तेषां भगवतोक्तं हेवज्रे—

मद्भवा हि जगत् सर्वं मद्भवं भुवनत्रयं।
मया व्याप्तमिदं सर्वं नान्यमयं दृश्यते जगत्॥ इति।

इदं कुत्सितानां दृष्टान्तमाह—

एक्कु खाइ अवर अस्र वि पोड़इ।
वाहिरेँ गइ भत्तारह लोड़इ। इति।

यदा कश्चित् अन्नाद्यभक्षणं करोति। एकमन्यस्तस्मिन् अन्नाद्यं प्रलयं कुर्वन्ति असाधारणत्वात्। तथा योगिनः एकपुरुषः भक्षयति। [82ᵇ] अन्यः पुनः भोक्तुमिच्छतां प्रलापेनापि वक्ष्यति। पुनरपि घरणि स्वस्वामिनं त्यक्त्वा गृहाद्बाह्यं गत्वा भर्त्तारं प्रेक्षत इति। अन्यो बहुचित्तत्वात् ज्ञानाकारेणैकीभावादिति। नेदृशी अज्ञानिना। एकेन सन्तुष्टिं करोति एकमात्रं जानाति न व्यापकः कुधियामपि तादृशं चित्तं तेन नष्टाः।

आवन्त ण दीसइ जन्त णहि अच्छन्त ण मुणिअइ।
णित्तरङ्ग परमेसुरु णिक्कलङ्क धाहिज्जइ॥ इति।

एतत् पूर्वोक्तगाहानुसारेण सुधियामपि ईदृशमाशयः कथ्यते। यथा घ[83ᵃ]रिणि स्वगृहे भर्त्तारं भोजयति अन्यस्यापि भर्त्तृभक्तादिं शोधयति स्वगृहान्निष्क्राम्य भर्त्तारं परीक्षयति तस्मात् आवन्तोऽपि न पश्यति गतोऽपि न च द्रक्ष्यति

1. A. सत्वाना; A. सम्मत; 4. B. नान्यं for नान्यमयं; 5. B. कुच्छितानां। 6. A. क्खाइ। A. योजइ, MS. पोलइ। 7. A. वाहिरे, A. लोजइ, MS. लोअइ। 8. B. यथा कथञ्चित अन्याद्या-; 9. A. एकपुरुषं; 10. A. -मिच्छता; वीक्षति; 11. A. वहुवितत्वात्। 12. B. ईदृशी अज्ञानिनां। 13. A. तादृश, ते। 14. A. आवन्त, दिस्सइ, जओणाह अच्छन्त ण मुणअइ। 15. -सरु, वोहि- for धाहि। 16. A. ईदृशः मायामयः, B. ईदृशमासयः; 17. A. भोजनं करोति after भोजयति; A. घरणि।

स्वगृहे स्थितोऽपि न लक्ष्यति। ईदृशं ज्ञानं निस्तरङ्गं स्वेच्छया परमेश्वरं निष्कलङ्कं सर्व्वायासरहितं तस्य ग्रहणं करोति। अनेनोक्तेन किं स्यात्। इह चेतजादियोगिनीनां स्वाभाविकं ज्ञानं उत्पद्यते। सा च न किञ्चिद्वेत्ति। तन्मयात्मना पश्यति। मया कृतं मयैवोत्पादितमित्यादि विस्तरः। एवमे[83b]व गुरूपदेशात् अवगन्तव्यं। पुनरपि—

आवइ जाइ ण च्छड्डइ तावहु।
कहिँ अपुव्व-विलासिणि पावहु। इति।

आवन्ति गच्छन्ति न सा कुलघरिणी त्यजन्ति। एतत् प्रसिद्धं कामरूप-पीठादिषु—यथा कश्चित् पुरुषः गृहे स्थित्वा तदन्यस्थानं गमयति अर्द्धमार्गात् पुनरागच्छति। तद्वत् योगिनीज्ञानप्रभावादिति। किमेतत् करोति कथ्यते। गच्छतोऽपि कस्मिन् स्थाने तत्रापूर्व्वविलासिनीसह सङ्गं प्राप्नोति। तदा मायया चित्तच्युतिं तेन करोति। या कुत्रापूर्व्वविलासिनी [84a] न प्राप्नोतीति यावत्। किं युक्तं इत्याह—

सोहइ चित्त णिरालं दिण्णा।
अउण-रूअ म देखह भिण्णा। इति।

तया योगिनीभिः सुखचित्तं शोभनीयं ललाटस्थाने दत्तमणिच्छाया गृहं ज्ञेया विज्ञानमभिन्नरूपतां यानि शरीरसुखयोरद्वयता भवति। एकरूपेति

2. A. सर्व्वापाय(स)रहितं; A. ज्ञानं for ग्रहणं। 4. A. मयेवे(वो)त्यादि। 7. A. अपपुव्व; A. यावहु for पावहु। 8. A. गच्छति। 10. A. पुनर्गच्छति। 11. A. त for -विलासिनी। 12. B. चित्ताकृति for चित्तच्युतिं; A. तया भर्त्ता- for या कुत्रा-। 13. A. किं युक्तं। 14. A. लिरारे, MS. लिरारे for णिरालं। 15. A. भिन्ना। 16. A. ताभिः for तया; A. दत्तमनिच्छया। 17. A. याति; A. शरीरसुख-।



यावत्। अतएव वक्ष्यति। यथा—अउनरूपं नेत्रादि पृथकत्वेन स्थितं तया स्थितेऽपि न पृथक्रूपं द्रक्ष्यसि। कुतः। यस्मात् सूत्रबन्धनादि एकरूपत्वं भवति तस्मात् स्त्रीपुमान्रूपं [84b] पृथग् ज्ञानेनाविष्टं सूत्रवदपृथग् भवति। एवमेव योगिनां ज्ञानं स्वभावोत्थितञ्च। न तया कृतेति। तैश्च सर्व्वकार्य्यकारणं नेच्छया साधितं भवति। स च—

काअ-वाअ-मणु जाव ण भिज्जइ।
सहज सहावेँ ताव ण रज्जइ॥ इति।

अनेनैव ज्ञानं यावन्न पृथग् जनानां काय-वाङ्मनो भिद्यते द्रवीभवति गुरु-प्रसादतः साश्रवधर्म्माणामस्तमन न भवतीति। तावत् तेषु सहजस्वभावेषु रज्यन्ति। येन योगिनीनयमनुत्तरं प्राप्यते। तत् किं योगिनीनयमित्याह—

घरवइ खज्जइ घरिणि-एहि ज[85a]हिँ
देसहि अविआर। इति।

घरपति यत्र देशे भक्षणं क्रियते। स्वघरणी च कृतमेतस्मिन् देशे पीठादिषु पश्यामः। ईदृशमविचारितं पृथगजनैरेतत् परिकल्पितं न योगीन्द्रैस्तेषां भावमाह—

माइए पर तहिँ कि उवरइ विसरिअ
जोइणिचार॥ इति।

1. A. वेषादि, HS. नेत्रादि। 2. A. तया, HS. तथा; A. पृथक्त्वं; A. द्रक्ष्यति; A. omits कुतः; A. सुषवन्धादि। 4. A. तया HS. तथा; सव्वकार्य्यकरणेच्छया, HS. -स्वेच्छया। 6. B. कायवाअमणु, A. कायवाकमन, HS. काय-वाक्-मन; A. विभज्जइ। 7. A. सहावे। 8. A. विद्रवी-। 9. A, मनं। 10. A. has न before रज्यन्ति। 11. A. घरणि एहि, MS. घरणिएहि; A. जहि। 12. A. देशहि अव्विआर, MS. देशहि अविआर। 13. A. घरवइ पति अत्र; A. भक्षण; A. स्वघरिणी। 14. A. -विचारं। 16. A. माइरे, MS. माइ रे; A. परतहि; MS. उवरइ; B. विसरिस। 17. A. ज्झोइनि चार।

यत्र घरपति मारितं तत्र परस्य नास्ति उपचारः। किन्तु परत्रेषु कृतं उपचार परतरः योगिनीज्ञानरूपात्मकमेतत्। परैः कुत्सितैर्मारितं भक्षितं दृष्टं। चर्म्मचक्षुषा योगिन्या च न मारितं न भ[85ᵇ]क्षितं। अपि सहजमयं सहजात्मकं सहजे निलीनं कृतमिति भावः। तस्मात् विसदृशं सर्व्वशास्त्रेष लोकव्यवहारेषु योगिनीनामाचारः। एतदेव स्पष्टयन्नाह—

घरवइ खज्जइ सहजेँ रज्जइ किज्जइ राअ विराअ।
णिअ पास वइट्ठी चित्ते भट्ठी जोइणि मह्नु पडिहाअ॥ इति।

घरपति भक्षिते सति सहजस्वभावेन रज्यते पुनरपि रागविरागं करोति अन्यभर्त्तारमाश्रयति रागविरागश्च रुदति। पूर्व्वभर्त्तारं शोचयति। निरस्य स्वप्रियस्य [86ᵃ] पार्श्वे स्थितेन च। एवं सा योगिनी चित्ते भ्रष्टा अचित्तमिव मम योगेन्द्रस्य वा प्रतिभासते। एवं समुदायो योगिनीज्ञानम-द्वितीयत्वात् न क्रियाकर्म्मतया प्रतिभासं करोति। कर्म्माकर्म्मायत्तेन न बाध्यते। सा पृथक्जनानां आभासमात्रमेवेति। अन्यच्च सर्वं चित्तोद्भूतं विकल्पमनया स घरपति स्वचित्तायत्तः शरीरः स भक्षितः। चित्तं शरीरं पीठोपपीठादिरूपं। योगिभ्यः प्रकृतयः। तन्निरोधात् प्रकृतीनां निरोधः। तदा किमुपलभ्यते। गुरूपदेशाज्ज्ञा[86ᵇ]नीयादिति। एवं विधायेदं परिभाष्यते।

खज्जइ पिज्जइ ण विचिन्तिज्जइ चित्ते पडिहाअ।
मणुवाहिरेँ दुलक्खहरे विसरिस जोइणि-माअ॥ इति

2. B. वरतरः। 4. A. भावं। 5. A. वा after -व्यवहारेषु। 6. A. **सहजि**; A. **रसइ** for **रज्जइ**, A. omits **किज्जइ**, MS. reconstructs it as **णट्ठो**; 7. A. **णिल**; A. **वइट्ठो, चित्ते, भट्ठो**। 8. B. रक्षिते for भक्षिते। 9. A. -विरागश्च। 10. B. नि॰स्य for निरस्य। 11. B. मया। 12. B. -कर्म्माकर्म्म तेन; A. परिभाषये। A. **न**; A. **चिन्तज्जइ**, MS. **निच्चिन्त जइ**; A. **पड्डिहाइ**; A. **-वाहिअ**; A. C. **-हले**; A. **विसरिअ**।



यत् किञ्चित् खादयन्ति पिवन्तीत्यादि कर्म्म क्रियते स च यं यं चित्तेन प्रतिभासते तं तं कुर्य्यात् किन्तु मनवाह्यि न क्रियते। किं युक्ति दुर्लक्षेण योगिनीज्ञानवन्तस्य लीनं पूर्ववत्। विसदृशयोगिणीमार्गस्तदाश्रितेन सर्वं सुस्थं भवतीति नान्यथा। पुनराह—

इअ दिवस णिसहि अहिमणइ[87ᵃ⁻ᵇ]तिहुअण जासु णिमाण।
सो चित्तसिद्धि जोइणि सहजसम्वरु जाण॥ इति।

एवं यः दिवसं जानाति रात्रिश्च अभिज्ञानमयं त्रिभूवनं यस्य निर्म्मानं सो चित्तसिद्धिः योगिनिसहजसम्बरज्ञानं भवति साक्षात् करोति वा। एवम-जानानामाह—

अक्खर वाढ़ा सअल जगु णाहि णिरक्खर कोइ।
ताव सेँ अक्खर घोलिआ जाव णिरक्खर होइ॥

इति अक्षरेषु सकलजग बाध्यते। इदं त्वया इदं मया अथवा इदं लटं इदं पटं पण्डितैरुक्तं। यावज्जीवं क्रियते न परमार्थं न किञ्चित् साध्यते। निरक्षरः [कोऽत्र विद्यते येन बुद्धत्वं साध्यते]। तावत् सैवाक्षरं घोलितं परिभावनाया वागजालं समस्तमर्हितं अलीककृतं यावत् निरक्षरत्वं याति। यावत् नेवं कृतं यावत् किं परमपदं प्राप्नोति। किं तदाह—

जिम वाहिर तिम अवभन्तरु।
चउदह भुवणेँ ठिअउ णिरन्तरु॥ इति।

From the last verse till the end of the Text I have MS. C. for the verses. 3. -ज्ञानन्तस्य; A. -स्तदाश्रतेन; B. स्तदाम्रतेन। 5. A. C. **दवस**; A. **तिहुमण, णिमाण**; MS. **तिहुमण**। 6. B. **चिन्त**; A. **वंसरु**, HS. **संवरु**; B. **जानु**। 11. A. **घोलिजा**; C. **घोलिअइ**; A. **णिरक्षर**। 12. A. has अति after इति; B. जगं। 14. A. omits portion within brackets; 17. A. **वाहिरे**; **अव्भत्तरु**; C. **अव्भन्तकरु**; 18. A. **चउजह, णिरतरु**।

योगीन्द्राणां यादृशं बाह्यं तादृशमभ्यन्तरं। किं तर्हि ज्ञानाकारत्वात्। तैस्त्रतुर्दशभुवनेषु निरन्तरावराग्रेण स्थितं परमकलाभावात्। स च योगी अमावास्यान्तेन चन्द्रकलामिवाशरीरत्वात्। तेनाह—[88^{a-b}]

असरिर [कोइ] सरीरहि लुक्को।
जो तहि जाणइ सो तहि मुक्को॥ इति।

अशरीरं सत्त्वं साक्षादस्तमितं भवति लुक्को स येन ज्ञानं सो तस्मिन् मुक्तोभवति। कुतः। यतः प्रत्यात्मवेदको लोकः। वेद्यज्ञादादेव नोत्पन्नशरीरत्वात्। निराकारं ज्ञानमेतत्। तस्य संज्ञा सुखप्रवृत्तिः। तदमृतं सहजमिति। पुरुषपुद्गलानां सहजात् पूर्वोत्पादविनाशकाले तत्रैव लीनः सुखस्य स्थिति नास्ति अस्थानत्वात्। तस्मात् पुर्वभावं निराकारं ज्ञानं तस्यैव धर्मधातुरिति आदिसंज्ञा। एवं यो जानाति गुरूपदेशात् स इहैव जन्मनि अनेनैव शरीरेण मुक्तो भवति नान्यथेति। अनेनोक्ते सति ग्रन्थकारस्य तत्परिणामतया स्वपरवस्तु न पश्यति तेनेदमुदीरयन्नाह

सिद्धिरत्थु मइ पढमे पढ़िअउ।
मण्ड पिवन्तेँ विसरअ एमइउ॥
अक्खरमेक्क एत्थ मइ जाणिउ।
ताहर णाम ण जाणमि ए सइउ॥ इति।

2. B. निरन्तरा अनवराग्रेण ; सरीर ; $88^{a-b}$ of B. missing, A. omits **कोइ** ; MS. **असरीर सरीरहि [णाहि] लुक्को।** 8. A. -शरीरत्वात्। 15. A. **पिवन्तेँ**, A. **विशमइ** which MS. restores as **विसरिअउ मइँ** ; C. **सरिअ** ; 16. A. **अक्खर-** ; **जाणउ** ; **जाणउ** ; A. **एसहि** ; MS. **ए सहि।**



यथा बालत्वे त्वादावेवा[89^a]क्षरशिक्षणायोपाध्यायस्याग्रे फलकेषु सिद्धिरस्तु इत्यादिना यावत्सूत्रधात्वादिव्याकरणपर्यन्तं तर्कमीमांसादि सर्वं पठितं तदा सर्वोत्तरेषु न किञ्चित् फलं दृष्टमज्ञानत्वात्। पुनरपि सकल्याणमित्राराधनायां सत्यां परिज्ञानेन विचारितं यः प्रथमं वाक्यं सिद्धिरस्त्वीति स सत्यं तत्परं यत् मया पठितमन्याक्षरमसारं। यथा भक्तरन्धनायां सारं गृहीतं मण्डं समयी पीत्वा शेषमसारमण्डमेव सारं तं पीत्वान्यं वि[89^b]स्मृतं गृहीतः सिद्धिरस्त्विति। एतदेवाक्षरमेकं पूर्वोक्तज्ञानमिह मया ज्ञातं। तस्मिन् वामस्य नामं न जानामि कीदृशमिति अवाच्यत्वात्। यथा बालत्वे नार्थस्त्वेष्ति सिद्धिरस्तु च। तथाप्यसौ प्रौढ़त्वेऽपि च। नास्ति नामवर्नादिख्यातिः। अन्ये कुधियाः न जानन्ति तेषां आह—

रुअणेँ सअल वि जोहि णए णाहइ।
कुन्दुरु-खणहि महासुहे साहइ॥ इति।

सहजरूपणेन सकलत्रिभुवनपतितं न ग्राहितं स्वयंभूज्ञानाकारेण च अवाच्य[90^a]नामेव वा। तदा पुनरपि स्वयं नष्टा परानपि बन्धायन्ति। किं तत्। कुन्दुरुक्षणेषु महासुखं साधयतीति। तस्मात् ते मूर्खदेहिनः। पुनरप्याह—

जिम तिसिओ मिअ तिसिणेँ धावइ।
मरइ सोसोसहिँ णभजलु कहिँ पावइ॥

2. A. -धातु व्याकरण-। 3. स्वकल्याण-। 4. A. -मित्राधारणायां ; A. विचारितयः। 6. A. गृहीतमण्डसमयी, HS. गृहीतमण्डं रसमयी ; A. तं पीत्वा अन्यत्। 7. A. गृहीत। 8. A. अन्यमन्यन्नाम for वामस्य नामं 10. A. रक्तधियो न जानन्ति B. कुधियैः न जानतं। 11. A. **रुअणे** ; A. **वि जो णउ।** 12. A. **कुदुरु-खणइ।** 13. A. **त्रिभुवनं।** 17. A. **तिसि तिसिअणे यावइ,** MS. **तिसिअ तिसिओणे।** C. **तिसणे** ; 18. A, **मर सोसेन भज्जलु कहि—** MS. **मर सोसे।**

यथा तृष्णार्त्तः अतितृष्णया अन्धत्वेन पानीयं दृष्ट्वा धावति तदा चक्षुषा नीहारमात्रं न पाणीयं तदार्त्तत्था सोसेन श्रूयते। आकाशजलं कुतः प्राप्यते न प्राप्यते इति यावत्। एवमिव कुन्दुरुयोगेन [90b]तत्त्वं न प्राप्यते। मूढ़लोकैरेवं तत्त्वं क्व ज्ञेयं किं युक्तिर्वा एतदेवाह—

कन्ध भूत्र-आअत्तण-इन्दीविसत्र-विआरु अप हुत्र।
णउ णउ दोहाच्छहे ण कहवि किम्पि गोप्प॥ इति।

स्कन्धधात्वायतनेन्द्रियविषयविकल्पविभ्रमरूपं पश्यति। यत्र लक्ष्यं लक्षणञ्च न विद्यते तेषु सर्वथा मरीचिजलवद्विश्वमुदकसंज्ञा प्रतीयते। उदकभावञ्च नास्त्येव मरीच्याभाससंज्ञया। मरीचिभ्रान्तिमिव हि उदकस्याभासं प्रतीयते इति। तस्मात् [91a] नवनवान्यान्य दोहाशब्देन तत्त्वं दर्शितं। तस्मिन् दोहामध्ये कस्मिन् दोहेषु किञ्चित् गुप्तं न कृतं गुरूपदेशं न विनाशितं स्यादिति। एतदर्थं सर्व्वेषां पण्डितानां क्षमापयतीत्याह—

पण्डिअ लोअहु खमहु मह एत्थु ण किअइ विअप्पु॥
जो गुरुवअणेँ मइ सुअउ तहि किं कहमि सुगोप्पु॥ इति।

हे पण्डितलोक ईदृशं ज्ञानं गुप्तागुप्तं मया कथितं तथा मम क्षमां कुर्व्वसि। कुतः। यतः सुगुप्तस्थाने न गुप्तीकृतं तथा गुप्तस्थाने प्रकाशितं सत्वोपकार[91b]चेतसा तेनेदं विकल्पं न कार्य्यमेवञ्च सम्मतं। ममैकाकिनस्य न भवति। कुतः। यतः ममापि स्वगुरोः सकाशात् यद्वचनमीदृशं श्रुतं तत् किं करोति सुगुप्तं प्रकटञ्च। एवमुक्तेन किं स्यात्। भव्यसत्त्वेषु गुप्तमिति। एतदेवाह—

1. B. अतितृषया; B. दृष्टं। 2. A. पायं; B. आर्त्तया, B. सोसे; B. कुत्र। 3. B. omits न प्राप्यते; A. योगे। 4. A. आअतन इन्दी, B. विआसिरु। A. अ पहुअ; 6. A. -च्छेदे, MS. सद्देन; B. कह; किंपि। 7. A. लक्षं। 8. B. विद्येत्; A. मरीचिजाल-। 9. A. भ्रान्तिरिव। 10. A. भासः। 11. A. गुरूपदेशेन। 13. A. एत्थ; 16. A. करोषि; A. -ऽप्रकाशित। 17. A. विकल्प; A. एकाकिनो; 18. स्वगुरुः। C. omits the last two verses.



कमलकुलिस वेवि मज्झठिउ जो सो सुरअ-विलास।
को त रमइ णह तिहुअणे हि कस्स ण पूरइ आस॥ इति।

अनेनात्यन्तादिकर्म्मिकाणां मृदुयोगिनां वा रागासक्तानाञ्च महारागक्री[92a]ड़यैव बुद्धत्वमुपाय इति दर्शितं भगवता। तथा इह मया अवतारितं कमलकुलिशद्वयेषु यत् सुरतविलासं को वीरपुरुषस्तत्र रमति। तेन त्रिभुवने कस्य न पुरित आसः। सर्व्वेषां तन्मयत्वेन तत्स्वभावतया सर्व्वासां महामुद्रा-सिद्धिः पूरिता भवति। महाकरुणाया आमुखीकरणादिति नियमः। किन्तु अधिमात्रेन्द्रियाणां नेदृशः। किं तदाह—यदि कमलकुलिशेन तत्त्वं तदा आत्मना सुखमुत्पाद्य परस्य सुखानुभवं विना गते [92b] न सर्व्वत्रिभुवनस्य सा पूरिता भवति। बुद्धज्ञानमेवेति। तस्मान्न तादृशं बुद्धज्ञानैकक्षणे अभिसम्बोधिः सर्व्वेषां समानकालत्वात् संक्षेपतः।

खण उवाअ सुह अहवा अहवा वेणि वि सोवि।
गुरुपाअ-पसाएँ पुण्ण जइ विरला जाणइ कोवि॥

क्षणश्चेदं सुखस्य चतुःक्षणभेदात्। अथवा अभिन्नेऽपि क्षणे तत्त्वमुपलक्षयेत्। स च परमविरमयोर्मध्ये अभिन्नमेव। प्रथमारम्भे विचित्रादिक्षणे उत्पादनायाऽभि[93a]न्ने सहजभावं सैव गुरुपादप्रसादेन पुण्यवशात्। यः कश्चित् तत्त्वविरलो लोकः जानाति क्वचिदिति न सर्व्वसत्वेषु साधरणत्वं भवति। तेनेदं मया सद्गुरूपदेशेन व्यक्तीकृतं पूर्व्वोक्तन्यायात्। सर्वजनेषु साधारणमिति। एवञ्च—

1. A. कुलिश; व्यवि; 2. C. तेँ; A. रमइण, B. रमइणेँ, C. रमइ णह; B. तिहुवणे; A. omits हि; C. तिहुवणहि; A. पूरअ, C. पूरिअ; 4. A. बुद्धत्वोपाय; A. has भवति after दर्शितं; 5. HS. inserts न before रमति; 9. B. सुखोत्पाद्य; B. सर्वं; 10. B. भवन्ति; 12. A. खणउ वाअ; A. omits one अहवा; A. विस, सोवि; 13. C. गुरुअ पसाएँ HS. गुरुह-; A. जानइ कोइ; 14. B. क्षणश्चायं। 15. B. इति भिन्नमेव। 17. B. विरला; A. सारत्वं for साधारणत्वं।

गम्भीरइ उआरहणेँ णउ पर णउ अप्पाण।
सहजान्देँ चउट्ठक्खण णिअ सम्वेअण जाण॥ इति।

यत् पुण्येषु विरला लोका जानन्ति तत् गम्भीरस्य विचारबलेन निरन्तर-स्मरणतया पक्षापक्षं निरुध्यते। [93ᵇ] परमगम्भीरे तत्र न परं नात्मनः किञ्चिदस्ति। आदावेव रहितत्वात्। ईदृशं सहजानन्देन चतुर्थक्षणे लोक कल्पितमध्ये निजसंवेदनं जानासि। पुनरपि तां जानाति स एव हि। अस्यानुशंसामाह—

घोरान्धारेँ चन्दमणि जिम उज्जोअ करेइ।
परममहासुह एक्कुखणे दुरिआसेस हरेइ॥ इति।

इह घोरान्धकारमध्ये चन्द्रकान्तमणिरुद्योतनं करोति। यादृशः सर्व्व-चौर-चण्डालादिभिर्हरति। तादृशः परममहासुख एकक्षणे [94ᵃ] संसार-दुश्चरिताशेषं करोति। तथा—

दुक्ख दिवाअर अत्थगउ जावइ तरवइ सुक्क।
ठिअ णिम्माणेँ णिम्मिअउ तेणवि मण्डल-चक्क॥ इति।

यथा ग्रीष्मकालदुःखदिवाकर अस्तमितो भवति तदा अत्यन्तशीतलत्वं करोति। तारागणनायकश्चन्द्रः शुक्रश्च उत्थितो भवति। ईदृशमण्डलचक्रादि-

1. A. घंभीरइ, नउ, अध्याण; 2. A. सहजानन्दे, -क्षणे, संवेसअ; 4. B. स्मरणया; A. नपरं; 5. A. चतुःक्षणे; 6. A. जानामि; ताम् for तां; 8. A. घोरेन्धारे, C. धोरेँ धारेँ; 9. A. एखुक्खणे दुरिआशेष; 10. A. इति यथा for इह; A. यादृश—; 11. A. तादृशः; 13. A. दुःक्ख दिवअर अत्थवि उठ्ठ तारावइ; C. अत्थविउ उइ; 14. A. विज्जा निमाणे निम्मिअउ; C. ठिअ णिम्माणेँ णिअउ; A. has सो after तेणवि; 16. B. ईदृशं।



भावना क्रियते। येन निर्म्माणस्थितेन विश्वं बुद्धसंवृत्या निर्म्माणं निर्म्मिणोति। तत्स्वरूपमण्डलचक्रं विज्ञेयादिति भावार्थः। पुनर्यो[94ᵇ]गिनां कर्त्तव्यमाह—

चित्तहिँ चित्त णिहालु वढ़ सअल विमुच्च-कुदिट्ठि।
परममहासुहे सोज्झ परु तसु आअत्तासिद्धि॥ इति।

इति चित्तेन चित्तं त्वं विचारयसि। किन्तु चित्तं अचित्तं चास्ति। पूर्व्वोक्तन्यायादेव द्वयोर्नास्ति। तथाचाह—

चित्तमेवेह नाचित्तं द्वयाभावान्न किञ्चन।
न किञ्चिन्नाम विद्येत भ्रान्त्या सर्व्वमिदं जगत्॥

तस्मात् सर्व्वं कुदृष्टयः मुञ्चसि त्यजसि। सकलात्मजीवपुरुषपुद्गलादयः सर्व्वं कुत्सितलोकव्यवहारसंवृतमात्रमेतत्। तेन तत् तथो[95ᵃ]क्तं। एवं सर्व्वं परममहासुखेषु शोधनं कुरु। येन परमभूमिलोकोत्तरबुद्धसम्वृतेषु प्रवेशं करोति। तस्य परश्रेष्ठसिद्धिरायता भवति। तेनेदं—

मुक्कउ चित्तगएन्द करु एत्थ विअप्प ण पुच्छ।
गअण गिरीणइ जल पिअउ तहिँ तड़ वसइ सइच्छ॥

इति मुक्तचित्तगजेन्द्रं कुरु। यथेच्छया संसारमध्येषु क्रीड़नं कुरु। अस्येदं विकल्पं न पृच्छसि। कुतः यतः सर्व्वं भावस्तत्त्वात्मकास्तत्त्वाश्रिताः न..त्वेषु निलीनाः भवन्ति। किन्तु प्राणातिपातादिकुकर्म्मं वर्ज्जसि। ये-

1. A. बुद्धसंस्थित्या; B. निर्म्मिनोति; 3. A. C. चित्तेहि; A. निहालु; C. णिफालु (?) C. वटु; A. विमुच्चह दिठ्ठि; 4. A. तसुआ अत्ता सिद्धिः; C. -सुह सेज्झ परु तेहि अत्ता-; 5. A. विचारय (असि); 6. A. -न्यायादेतयो-; 7-8. HS. takes it to be a *dohā*; 9. A. सर्व्वकुदृष्टीमुञ्च; 11. A. परस्वेष्टसिद्धिरासन्ना; 13. C. म for ण; 14. A. तहि, B. तट; C. तड़; A. वसउ; 16. A. विकल्प।

स्तीर्थिकादि नरकं यान्ति कारुणिकेश्च दशकुशलकर्म्मपथपरिपालनया सर्व्वं सुखं भवति। तेन गगनगिरिणा हस्तिवत् सर्व्वव्यापकत्वेषु नद्यां जलं पिवन्ति। यः पुरुष यतः तस्मिन् तटेषु महासुखनद्यां शोषयति। इदं महासुखेऽपि विकल्पमात्रं तस्या सङ्गमिति भावार्थः।

विसअ-गएन्दें-करें गहिअ जिम मारइ पड़िहाइ।
जोइ कवड़िआर जिम तिम तहो णिस्सरि जाइ॥

तथा विषयगजेन्द्रेषु चक्षुरादिषु सर्व्ववस्तुषु गृहीत्वा इन्द्रियविषयादिभिः करेण ग्रहणमिव दन्तिना तदा मारणमिव प्रतिभासते। [यावत् प्रतिभास्यति तावत् कस्य विषयिणश्च च] स्वभावमेतत् तस्यैव दृश्यते। न मारणं क्रियते नरकादिषु नीयते। ईदृशं योगेन्द्राणां कवड़ीकाराद्यैर्यादृशं प्रतिभास्यति। तादृशमिव ततो निःसरित्वं गच्छति। सहजेषु प्रलीयते। न कवड़ीकाराद्याः तस्य बाध्यते लोकस्य प्रतिभास एवेति। [$96^{b}$] एवं भक्ष्यभक्ष्येषु न लिप्यते इति यावत्। तथाचाह—

जो भव सो णिव्वाण खलु स उण मणहु अण।
एक सहावें विरहिअ णिम्मल मइँ पड़िवण॥ इति।

नास्ति योगिनः विशेषाद्विशेषः संक्षेपः। यथा युगनद्धक्रमेषूक्तमार्थ्य-नागार्ज्जुनपादेन भर्व्वनिर्व्वाणेत्यादिना च इह एतदेव यत् भवनिर्व्वाणं खलु

1. B. -परिपालनाया ; 2. A. सर्व्वव्यापकेषु ; 3. A. पिवति ; A. यतोऽस्मिन्, नद्या। 5. A. **विषअ गजेन्दे कर** ; **जणि** for **जिम** ; **पड़िहासइ** ; 6. A. **जोवि, कवाड़आर** ; C. **कवड़िआरमणिच्चह-** ; A. **हो णिसरि** ; 7. A. विषये: ; 8. A. सारण- for मारण- ; A. has व्रतिनं कुरु तावत् before प्रतिभासते- ; A. has for the portion in bracket only- तावकस्य विषयिणश्च ; 10. A. कीदृशं ; प्रतिभासते ; 11. A. निःसारितं, B. प्रलीयतः ; A. -काराद्याः ; 14. A. **निवाण खलु भेवु न मसहु पस** ; C. **खलतेउ ण मसहु मस।** 15. A. **एकसहावे, निम्मल मइ** ; 16. A. योगिना ; इहापि तदेव ;



सर्व्वेषां ह हयवचनेषु मविज्ञेययुगनद्धद्वयं तच्च भेदमन्यं विज्ञेयादिति। किं तर्हि एकस्वभावेन यदद्वयं सर्व्वशास्त्रेषु सिद्धान्तं तत् तस्मादवि[$97^{a\text{-}b}$]रहितं एकानेकभावं। किन्तु अद्वयोऽपि निर्म्मलः प्रतिपन्नः परमाद्वयमिति भावः। एतदेव स्पष्टार्थमाह—

घरहि म थक्कु म जाहि वणे जहि तहि मण परिआण।
सअल णिरन्तर वोहि-ठिउ कहिँ भव कहिँ णिव्वाण॥

इत्यनेन स्वगृहेषु स्थितिं मा कुर्व्वन्ति। वनान्तरमपि गमनं मा कुरु। किं तर्हिं निश्चितं द्वयस्थानेषु गम्याद्विकल्पं जायते। कथं क्रियते इत्युच्यते। यस्मिन् यस्मिन् स्थित्वा वा चंक्रमणभक्षादिं कृत्वा तत्र मनस्य परिभावनं कुरु अलोकं मनः स च विज्ञप्तिं कुरु। तच्च पूर्व्वं निराकृतमसिद्धतात्। तस्मात् सकलत्रैधातुकेषु निरन्तराव्यवच्छिन्नप्रवाहात् बोधिस्थितं सिद्धं। न केनचिदुत्पादितं स्वयम्भूत्वात्। तदिह कुधीभिः मूढ़त्वेन परिकल्पितं भवनिर्व्वाणयोरद्वयोः केनेदं न स्यात् उक्तन्यायादपि। तस्मिन् भवं तस्मिन् निर्व्वाणं न भवति। कुतः। यतः आदावेव विश्वस्योत्पादं नास्ति तत् किमिति दृश्यते। मायावदिति भ्रान्त्या प्रतिभासमात्रमेवेति। यथा दर्पणादिषु प्रतिविम्ब दृश्यते तद्विचारान्नोपलभ्यते। तत् विम्वपिण्डपरमाणवत्वादिभेदेनासम्भवमिति। कस्माद् भवनिर्व्वाणयोरसम्भवं। तथाचोक्तं—

निर्व्वाणञ्चैव लोकञ्च मन्यन्ते अतत्त्वदर्शिनः।
नैव लोकं न निर्व्वाणं मन्यन्ते तत्त्वदर्शिनः॥
निर्व्वाणञ्च भवश्चैव द्वयमेतत् न विद्यते।
परिज्ञानं भवस्यैव निर्व्वाणमिति कथ्यते॥

1. A. द्वयद्वयवचनेषु, भेदमन्य- ; 2. A. किन्तु ह्येकस्वभावेन ; B. य य शास्त्रेषु ; B. $97^{a\text{-}b}$ lost. 5. A. **वने, तँहि** ; C. **जाहु** ; 6. **सअलु, निरन्तर, कहि, निवाण** ; C. **कहि** ; 7. A. गर्भा- for गम्या ; 9. A. चक्रमण- ; 16. A. पिण्डपरमाणवन्धादिभेदेनासम्भवमिति ; 17. A. -सम्भवः ; 20. द्वयमेव।

तस्मात् सिद्धं परमाद्वयं बोधिरूपं स चाह—

णउ घरे णउ वणेँ बोहि ठिउ एहु परिआणहु भेउ।
णिम्मलचित्त-सहावता करहु अविकल सेउ॥

इति। इदं उपलक्षणायां न घरे न वनेषु बोधि स्थि[98ᵇ]तं। एवं भेदं परिजानासि सन्ध्याभाषान्तरेऽपि गृहं शरीरं वनं घटपटादिषु तत्र न बोधिः। कुतः सर्व्वं ह्यसम्भवात्। एवं भेदं यत् दृश्यते लोकादि तत् सर्व्वं उत्पन्नविनाशिनः। नेदृशो बोधिरविनष्टत्वात् च। तेनेह निर्म्मलचित्तस्वभावतां कुर्व्वति। यैर्विकल्पना विकल्पसि समस्ता सङ्गता त्यजसीति विस्तरः। तैर्बोधिरूपमायाति तदाह—

एहु सो अप्पा एहु परु जो परिभावइ कोवि।
तेँ विणु वन्धे वेट्ठि किउ अप्प विमुक्कउ तोवि॥ इति।

[99ᵃ-101ᵇ] इदमात्मा न इदं परः येन केनचिद्विपरिभावितं तेन विना बन्धनेन आत्मानं विटकितं विकलीकृतं मुक्तोऽपि स्वभावयातं तदा नो मुक्तः तस्मात् स्वपरविभागं न क्रियते इति यावत्। तदिह—

पर अप्पाण म भन्ति करु सअल णिरन्तर वुद्ध।
एहु से णिम्मल परमपउ चित्त सहावेँ सुद्ध॥ इति।

2. C. सउ; A. वने; परिआणउ; 3. A. सहावउ, A. करह, C. करहि; A. C. अविकल; 4. B. उत्तलचणायां; 8. A. कुर्व्विति; 10. C. स; A. अध्या, पर, कोइ। 11. A. ते; C. वेटि किउ, A. वन्धि किउ; C. विमुक्कवि; 12. B. *folia* 99ᵃ-101ᵇ lost. 15. A. भत्ति; C. भन्ति; A. निरन्तर; 16. A. सो; C. से; C. सहाव।



